कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. M 2282 विषय धर्मशास्त्र

नाव आश्वलायन गृह्यसूत्र

लेखक / लिपीकार —

पृठ 41 काळ — पूर्ण / अपूर्ण

Checked 2012

ज्या

जुहुयादिति याज्ञिका वासुदेवदीक्षिताश्चाहुः ॥ भूस्वाहेत्यों[illegible] हुतिनवकमप्याहवनीय ए
व होतव्यमिति कारिकासंप्रदायकारौ ॥ आज्यमित्यादौ प्रसंगात्संस्कृतं च तेनैवाज्येन प्रा
यश्चित्तमपि होतव्यमिति हरिस्वामिनो याज्ञिकाश्च ॥ सर्वत्रान्यदेवाज्यं संस्कृत्य प्रायश्चित्तं
होतव्यं नान्यार्थसंस्कृतेनेति कर्कोदयः ॥ प्रवासात्रात्यादिना यजमानस्य त्यागकरणा
संभवे पत्न्या त्यागाः कार्याः ॥ स्वयंकर्तृके त्यागाभाव इति गर्गः ॥ अथेदमुच्यते ॥ पदार्था
द्विविधाः ॥ आरादुपकारकाः संनिपत्योपकारकाश्च ॥ तत्रारादुपकारकाण्युच्यंते ॥
अदृष्टार्थत्वपक्षे प्रणीताप्रणयनं ॥ कुक्कुटाहननं ॥ स्फ्योदकप्रहारः पूर्वाघारो ज्वलि
करणोत्तराघारप्रयाजाज्यभागानुयाजपत्नीसंयाजदक्षिणाग्निहोमपूर्णपात्रनि
नयनाग्न्याहवनीयोपस्थानांतं भागावेक्षणवर्जितं ब्राह्मणतर्पणं कर्मापवर्गाश्चेत्ये
तान्यारादुपकाराणि ॥ अन्यानि संनिपत्योपकारकाणि ॥ तत्रारादुपकारकस्याकरणे ॥
नादिष्टं हुत्वा प्राक्कर्मसमाप्तेस्तस्य करणं ॥ संनिपत्योपकारस्य च द्रव्यसंस्काररूपस्या
करणे प्रायश्चित्तं हुत्वा संस्कार्यद्रव्यस्य मुख्योपयोगात्प्राक्करणं न तदूर्ध्वं लोप एव ॥ अ
करणनिमित्तं प्रायश्चित्तमात्रं भवति ॥ तदुक्तं निदानसूत्रे ॥ अंगमपरिसमाप्ते प्रधा
ने क्रियते परिसमाप्ते तु न कर्तव्यं तदुपकारार्थत्वात् ॥ द्रव्ये संस्काररूपमुपयुक्ते द्रव्ये
द्रव्ये तूत्पन्ने तदर्थत्वादनरिक्तं प्रायश्चित्तं हूयते संस्कारलोपात्संस्थिते प्रधाने यदंग

स्रुतं तस्याप्यर्थ इति ॥ अकाले चरतु स्यक्रमानुग्रहार्थं पुनरावृत्तिर्न भवति ॥ तदुक्तं
कठसूत्रे ॥ प्राक्कालात्तत्तत्कर्म नावर्तयेदंतरितं प्राक्समापनात् कुर्यादिति ॥ मानवे च ॥
कर्मानंतरितं कुर्यात्संस्कारांतरे प्रायश्चित्तमेव जुहुयात् ॥ द्रव्यावृत्तौ सह मंत्रमावर्त्तयेत्
ष्टीवेति ॥ तथा देवतादानयाज्यापुरोनुवाक्या मंत्र कर्मविपर्यासेऽनाम्नातप्रायश्चित्ता
नां चापदि त्वन्नः स त्वन्नोऽयाश्चाग्न इत्येताभिः जुहुयाद्व्याहृतिभिश्चाऽकाले वा चेवि
सृज्य वेष्टवी निगद्य पुनर्गच्छेदिति ॥ काठके च ॥ मंत्रांतरे कर्मविपर्यासे वा त्वन्नो अ
ग्न इति द्वाभ्यां जुहुयादिति ॥ आपस्तंबः ॥ एकस्मिन्दोषे श्रूयमाणानि प्रायश्चित्तानि
समुच्चयेरन्न जपो होमः इत्याचेति ॥ मानवे ॥ ब्रह्मा प्रायश्चित्तानि स्रुवेण जुहोति भूः
स्वाहेति गार्हपत्ये यजुषां भुवः स्वाहेति दक्षिणाग्नौ सामतः स्वः स्वाहेत्याहवनीये सर्व
तो भूर्भुवः स्वः स्वाहेत्याहवनीय एवेति ॥ अत्र स्रुवेणैव प्रायश्चित्तहोमः उक्तः ॥ तेन स्रु
गसंभवे च आज्यासंभवे च कदाचित्स्रुवेणाप्येकाभूरित्याद्या आहुतिर्होतव्या ॥ अकर
णाच्छाखांतरीयस्यापि श्रेष्ठत्वात् ॥ महापितृयज्ञे च यज्ञोपवीतित्वावसरे निमित्ते जाते
नैमित्तिकहोमोपि यज्ञोपवीतिना कार्यः ॥ प्राचीनावीतित्वावसरे च प्राचीनावीतिना तत्
त्र भुव इति होमः त्वन्न इत्यादि सर्वप्रायश्चित्तहोमश्च दक्षिणाग्नावेव कार्यः ॥ दक्षिणाग्नि
राहवनीयवदित्यनेनाहवनीयकार्यस्य दक्षिणाग्नौ विधानात् ॥ अवभृते वाप्सु सर्वप्रायश्चि
त्तहोमः ॥ राजसूये च परिश्रितसु च्यंबकेषु चतुष्पथे स्थापिते ग्नो भुव इति अध्वर्यव होम

१ त्ववृभ्र यादोदुग्धिणाग्नावेव ॥ अथाग्निहोत्रहोमे प्रायश्चित्तान्यभिधीयंते ॥ यद्यग्निहो
त्रीगौर्दुह्यमाना ऽपविशति तदाऽडदुहस्पाद्द्वा दिति राद्ध्र्यं त्रपताव धार्दिं ञ्चोय रुण्वतीभां गंभि
ाध दुग्ध्वाप नागात स्मै ब्राह्मणाय दद्यात् ॥ यं ब्राह्मणमभ्यागमिष्येनस्यात् ॥ अ
भक्त मतन्भेदः ॥ यः पुनर्नागच्छति तस्मै दद्यादिति कारिकायां ॥ यद्यतियजे
मानोनागमिष्यन्नेभवति कार्योद्यार्थमपि तस्मै दद्यादित्याह्निकाध्वर्त्तस्वा
मिनश्च ॥ द्वेष्यायवादद्यादिति क्षारवायनः ॥ यस्यान्ने नाद्यात् तस्मै दद्यादि
तिमानवः ॥ अस्यैव प्रायश्चित्तस्य पक्षांतरमुच्यते ॥ अथ वा दुह्यमानोप
विष्टां गां दंडेन जघनप्रदेशे ताडयित्वा तूष्णीमेवोस्थाप्याग्निहोत्रार्थं दाह
येत् ॥ अस्मिन्पक्षे तस्यां गोर्दानं न भवति ॥ यद्यग्निहोत्री गौर्दुग्धं न द
दाति ॥ तदा प्रायश्चित्त होमं विनाप्यन्यां दोहयेत् ॥ यद्यग्निहोत्री गौर्दुह्य
मानाशब्दं कुर्यात् ॥ तदा तृणानि हस्तेन ॥ छिद्ध्वा ग्रासयेत् गोर्मुखं वध्वेन्नो
येत् ॥ सूयवसाद्भगवतीति मंत्रेण ॥ ११ ॥ अथ मोकंडिका ॥ स्तस्या दोहका
लेनाब्दं स्तनवत्स्याः गोः पयसाग्निहोत्रं जुहोति ॥ प्रायश्चित्तविधानेनं दुष्टत
त्वांकमानं तस्य रिस्यजति ॥ यदाग्निहोत्र्यादोहने प्रारब्धे स्तनेभ्यो रुधिरं तिः

मिपचेत् ॥ ततो जितेनेत्रा धर्मीतां १
अध्यवरुणपुत्रेति मंत्रेण नानुपविष्टा गुह्या १

सरतितद्यापूर्वव्युत्क्रामतेति प्रैषः॥ मेक्षणस्योत्कल्पनं॥ अन्वाहार्यपचनं प
रिश्रयितवा इति प्रैषः॥ अन्य एवं प्रेषितो दक्षिणाग्नेः परितः परिश्रितं क
रोति॥ ततो दक्षिणाग्नौ तस्य लोहितदुग्धस्याधिश्रयणं॥ मेक्षणेन तस्या
वालनं॥ प्रेषितो होतास्य दक्षिणाग्नेरैवोद्धेभस्मनि क्षेपणेनैव रुद्राय स्वा
हेति होमः॥ उदकोपस्पर्शनं॥ इदं रुद्रायेति त्यागः॥ अन्येनाऽदुष्टेन पय
साऽग्निहोत्रहोमः॥ तस्या रुधिरदोहिन्या गोस्तस्मै दानं यं प्रतिगच्छेत्तु॥
क्रतौ तु दक्षिणाग्नावेव तूष्णीं होममुक्तः॥ तस्मिन्ने प्रपचितात स्मिंस्तू
ष्णीं जुहुयादिति॥ यदि होमसाधनं पयो गाविस्थितमेव सर्वपभाक्रम
णाऽमेध्यभक्ष्यमाणादिना दुष्टं भवति तदा गाविस्थितमेव तस्यो रुद्रदै
वत्ये पयस्तिमंत्रेण रुद्रायेति दिक्ष्यते॥ ततउदकोप०॥ वत्सस्य गोस्त
नसंबंधावसरे गाविस्थितं यदि क्रमभाक्रमणाऽमेध्याभक्षणादिना
दुष्यति॥ तदा गाविस्थितस्यैव वायव्येन तेपयदृस्यन्ति देवा एवं भवति॥ स्त ॥९६॥

नेभ्यो निष्कास्यमानं पयो यदि दुष्यंति तदा तत् दुष्टं पयो दोहने नैवाऽग्निभ्यां
स्वाहेति जुहोति॥ आहवनीये समिदाधानपूर्वकं॥ अथवा॥ अग्निनावेतहुं
पय इति पात्रस्थस्यैव त्रिदेशं कुर्यात्॥ अथवाश्रुस्रुतं॥ गार्हपत्याद् दुष्टं भस्मो
त्तरतो निरूह्य तस्मिन् दुष्टं भस्मनि तत्सर्वं तूष्णीं निनयोपर्युदकं निनयेत्॥
ततोऽन्येन शुद्धेन पयसाऽग्निहोत्रं जुहुयात्॥ दुग्धं पयो यद्यधिश्रपणात्प्रा
ग्विनश्यति तदा तद् दुष्टं पयो दोहने नैव सोमाय स्वाहेति आहवनीये जुहुया
त्॥ ॥अथवा सोमे तत्ते पय इति पात्रस्तमेवाति दिशेत्॥ अथवाश्रुस्रुतं॥
अधिश्रयणार्थं येऽङ्गारा उत्तरतः पृथक्कृता भवंति तान् प्रस्रुस्थत्तेषामंगा
राणां स्थाने यद् दुष्टं भस्म भवति तत्र तूष्णीं निनयेत्॥ उपर्युदकं निनयेत्॥ अ
न्येन शुद्धेन पयसाग्निहोत्रं जुहुयात्॥ अग्नावधिश्रितं पयो यदि दुष्यति
स्थास्न्येव वरुणाय स्वाहेति तत्सर्वं जुहुयात्॥ अन्येन शुद्धेन पयसाऽग्नि
होत्रं जुहुयात्॥ वरुणे तत्ते पय इत्यस्यातिदेशो वा॥ अथवाश्रुस्रुतं॥ येऽङ्गारा:

पयसोऽधिश्रयणार्थमुत्तरतः स्तृता भवंति॥ तेष्वेवाऽगारेष्वेव दुग्धं तेनैव
पात्रेण तूष्णीं जुहुयात्॥ तथा होमः कर्तव्यो यथा तेन होमेन तेऽगाराः शा
म्येयुः॥ तेषां गाराणामुपर्यकासेकं कुर्यात्॥ ॥उदंतं तोमेतस्थाल्यामूर्ध्वं
गच्छेत यस्य पयो यदि दुष्टं भवति तदा पृथ्व्यै स्वाहेति तस्य शांत्ये होमः॥ पृथ्वींनेत
त्ते पयद्रस्यति देशो वा॥ यदा उत्कलितमुपक्रांति धाभ्रुवस्य पयो दुष्यति तदा मरु
द्भ्यः स्वाहेत्याहवनीये तत्पयो जुहुयात्॥ मरुत एतेहुः पयद्रस्यति देशो वा
सर्वत्रान्येन शुद्धेन पयसाऽग्निहोत्रहोमो भवति॥ यदा बिंदुमुपरि जातं बु
द्बुदं पयो विनश्यति तदा सरस्वत्यै स्वाहेति शांत्य होमः॥ सरस्वत्येतत्ते पय
द्रस्यति देशो वा॥ यदा बिंदवो प्यूपक्रांता भवंति तदा दुष्टं पयो मित्राय स्वाहेत्या
हवनीये जुहुयात्॥ मित्रेतत्ते पयद्रस्यति देशो वा॥ उद्वास्यमानं चेत्पयो विनश्य
ति तदा सवित्रे स्वाहेति शांत्य होतव्यं॥ सवितरेतत्ते पयद्रस्यति देशो वा॥ त्रिरु

ह्रासनोत्तरकाले यदि पयो विनश्यति तदा उदिस्येस्वाहेति हांस्येजुहोति॥ अ
दित एतन्ते पय इत्यतिदेशो वा॥ ॥ अग्निहोत्रहवण्यां स्रुवेणोन्नीयमानं पयो
यदि विनश्यति तदा विश्वेभ्यो देवेभ्यः स्वाहेत्याहवनीये होतव्यं॥ विश्वेदेवा एत
द्वः पय इत्यतिदेशो वा कार्यः॥ स्रुचि गृहीतं पयो यदि दुष्यति तदा बृहस्पतये
स्वाहेति हांस्येन होतव्यं॥ बृहस्पत एतन्ते पय इत्यतिदेशो वा कार्यः॥ अथ वा श्रु
त्यन्तं॥ यदुन्नीतं पयो यदि दुष्यति तदाहवनीये समिधमाधायाहवनीयादु
दीच्यं भस्म पृथक्कृत्वा तस्मिन्भस्मनि तत्पयस्त्रुच्या॥ ननियोपर्युदकमासिं
चेत्॥ अथ वा दुष्टेनैव होमः कार्यो न वेदेवा इति श्रुतेः॥ यदि आहवनी
यं प्रति होमाय नियमानं पयो यदि दुष्यति तदा धात्रे स्वाहेति होतव्यं॥ धा
तरे [illegible] तन्ते पय इत्यतिदेशो वा यद्वाहवनीयं प्रति तत्पनीय क्रियति मार्गे
चलितं पयो दुष्यति तदा विश्वकर्मणे स्वाहेति हांस्ये होतव्यं विश्वकर्मन्ने
तन्ते पय इत्यतिदेशो वा॥ ॥ यदा गार्हपत्याहवनीययोर्मध्ये देशे आनीतं

॥६॥ पयोयदिविनश्यतितदावैश्वानरायेस्वाहेत्याहवनीयेतस्यहोमः॥वैश्वा
नरएतन्नेपयद्दस्यतिदेत्रोवा॥ ॥उन्नीतस्योपरिवर्षेर्ममक्षेयस्करमि
ध्या तित्वातेनैवपयसाहोमःकार्यः॥ ॥आहवनीयसमीपंप्राप्तंपयोयदिवि
नश्यतितदाद्यावापृथिवीभ्यांस्वाहेतिंतस्यहोमः॥द्यावापृथिवीएतंद्वं
पयद्दस्यतिदेत्रोवा॥ ॥यदिहोमात्प्राग्विनष्टंतदाइंद्राग्निभ्यांस्वाहेतिमंत्रेण
पूर्णाहुतिर्हौतव्या॥ ॥इंद्राग्नीएतद्दंपयद्दस्यतिदेत्रोवा॥प्राशुत्तराहुतेयदि
स्त्रकस्थंपयोविनश्यतितदाप्रजापतयेस्वाहेतिविनष्टंपयोजुहुयात्॥ ॥
प्रजापतएतन्नेपयद्दस्यतिदेत्रोवा॥ततःपुनश्चतुर्गृहीतंगृहीत्वोत्तराहुति
होमः॥तच्चतुर्गृहीतमन्येनकेनचित्स्रुवेषगृहीत्वा३स्मैहोत्रेप्रानीयस
मर्पणीयं॥वक्ष्यमाणन्यायानुसारात्॥सकृद्गृहीतेनोत्तराहुतिरितिसं
प्रदायः॥उत्तराहुतिहोमानंतरंप्राग्भक्षाद्यदिपयोविनश्यतितदाइंद्रा
यस्वाहेत्याहवनीयेजुहुयात्॥इंद्रैतन्नेपयद्दस्यतिदेत्रोवाकुर्यात्॥एवंय
॥६॥

धाकालोपपाते तद्दैवते तद्दैवतं होमं कृत्वा ॥ अथ वा रुद्रैतन्ते पयइत्यादिप्रयो
गेन तत्र दुष्टं पयो निरुद्धियाऽन्येन शुद्धेन पयसाग्निहोत्रं जुहुयात् ॥ तत्र गावि
स्थितस्य पयसोऽवसोपसर्जनकाले विनष्टस्य च होमासंभवादतिदेशपक्ष ए
व भवति ॥ दुह्यमानमाभिवनमित्यादिषु तु भयं भवतीति कारिकायां ॥ अथ वा हो
मविधानसामर्थ्याद्धविःस्थितं दुष्टमर्थाद्दुग्ध्वा होतव्यं होमपक्षे ॥ ॥ तंडुला
ज्ययवागूदध्यादिषु होमद्रव्येषु विनष्टेषु नैतान्येव प्रायश्चित्तानि यथासंभवं
कर्तव्यानि ॥ तत्रैवमतिदेशप्रयोगः ॥ अमुक एतत्ते तंडुलाः ॥ एतत्ते आज्यं ।
एषा ते यवागूः ॥ एतत्ते दधीत्यादि ॥ काठके ॥ उन्नीतमवदृष्टं मित्रो जनानि
ति समिधमादाय तद्दुत्वाथान्यां दुग्ध्वा पुनर्जुहुयात् ॥ अग्निहोत्रमुन्नीतं
कीटावपन्नं हिरण्यगर्भ इति वल्मीकवपायामवनीयान्यां दुग्ध्वा पुनर्जुहु
यादिति ॥ तथा यदि सर्वमुन्नीतं स्कंदेद्धि स्त्रिर्वा नन्तदाइये ते यद्यं वे च तुर्थ
मुन्नीतं स्कंदेत्स्यादन्यां चोषमवनीय चतुरभ्युन्नीय होतव्यमन्यथा वाँ ऽ

॥८॥ भिदोह्यमिति॥ आश्वलायनब्राह्मणेपि॥ तदाहुर्यस्याग्निहोत्रमुपसृष्टादु
ह्यमानास्कंदेत्का तत्र प्रायश्चित्तिरिति सा यत्र स्कंदयेत्तदभिमृश्य जपेद्
दद्यद्दुग्धं पृथिवीमसृप्त यदोषधीरत्यसृपद्यदपः॥ पयो गृहेषु पय ओ
षधीषु पयो वत्सेषु पयो अस्तु तन्मयीति तत्र यत्परिशिष्टं स्यात्तेन जुहुयात्
यद्यलं होमाय स्याद्यद्यु वै सर्वं सिक्तं स्यादन्यामाहूय तां दुग्ध्वा तेन जुहुया
दिति॥ ॥अग्निहोत्रार्थं होमद्रव्यं पयो यवाग्वादिकं यदि स्कंदेत् स्थाल्यास्तेनो
भूमौ पतेत्॥ अन्यत्र वा भस्मकाष्ठादौ तदा अस्कन्नमधीत प्राजनीति मंत्रेण
तद्भस्मादौ पतितमभिमन्त्रयेत्॥ ततः स्कन्नस्योपर्युदकं निनयेत्॥ ततः स्था
ल्यां शेषेणाग्निहोत्रं जुहुयात्॥ दोह्यमानस्य स्कंदने अभिमर्शनानन्तरं भू
तास्थाल्यभिषिच्येत अथवाऽन्यस्मिन्कालेऽभिमर्शनमात्रमेव तु एवमश्रुत
त्वादिति याज्ञिकाः॥ यदि पयो यवाग्वादेराधारभूतास्थाल्यभिषिच्येत अथवाऽ
धोमुखी भवेत्॥ तदास्कन्नं द्रव्यस्कन्ने प्रायश्चित्ते नाऽस्कन्नमधीत प्रजनीत्यभि
॥८॥

स्त्रस॥भूर्भुवः स्वरित्येताभिर्महाव्याहृतिभिः स्कंनस्योपर्युदकं निनीय
यदि स्थाली भिन्ना भग्ना तदा तस्याः भग्नायाः भूमिर्भूमिमित्यभिमर्शनं
स्तु ताकपालानि भस्मोद्धायेभस्मराशौ निवयेत्॥ अधोमुखीभावेन्तूदकासे
कांतमेव॥ यदि हविर्यज्ञियं चरुपुरोडाशाज्यसान्नाय्यमांसादिद्रव्यं स्कंदति तदा
स्कंदस्य भूम्यादिपतितस्य भुवपतये स्वाहेत्यादिमंत्रत्रयेणाभिमर्शनं कुर्यात्॥
बर्हिषस्कंनेनाद्भ्यिते स्याथर्वणसूत्रे॥ सोमेपि दीक्षणीयादौ हविर्यज्ञियस्कंद
नेकाल्पाहुतिवाचनपूर्वकमिदमेव प्रायश्चित्तं भुवपतये स्वाहेत्यादिभिरभिम
र्शनं भवति॥ यदि पविध्याहुतिः स्कंदेदाग्नीध्रं ब्रूयादेनां संरूष्य जुहुधीनिय
थाऽवदानं संपाद्य उपवषट्कृते मध्ये पाणिना जुहोति तत्सेमे पूर्णपात्रं दद्यात्॥ भु
वपतये स्वाहेति बर्हिः परिधी स्कंदनमभिमंत्रयेत् इतिमानवे दर्शनादेतः परि
धिस्कंदनेन प्रायश्चित्तं॥ सोमयागे रसरूपसोमस्कंनदेवांदिवमगान्नित्यभि
मन्त्रोत्॥ यूयो रोजसे ति मंत्रेण वा स्कंनं सोममुदकेनोपसिंचेत्॥ अथ विप्रति
पत्तिः॥ सोमेहाविर्यज्ञियस्कंनदेवां दिवमित्यभिमन्त्रो दितिकर्कः सोमे सोमादि

॥८॥ ंकस्कंनमितिवासुदेवः॥रसरूपं सोममितिहरिस्वामिनः॥स्रुच्युन्नीत
स्य सर्वस्य स्कंदने स्रुग्भेदे च तत्रैवोपवेशनं कर्तव्यं॥ यत्र स्रुग्भिन्ना स
र्वस्कंदनं वाजानं तन्त्रैवोपस्पर्शनं कर्त्तव्यं ततोऽस्कंनधीतप्राजानीति मं
त्रेण स्कंदनस्याभिमर्शनमुपर्युदकासेकः॥ततो होमकर्तुरन्यः कश्चित्स
र्वस्कंदने तु तस्यामेव स्रुक्चि स्रुग्भेदे वान्यस्यां घृतपूर्णादि संस्कृतायां स्थाल्याः
सकाशात्रिषवर्जितं च तुरुन्नीयानीयास्मै होमकर्त्रे सर्वस्कंदने स्रुग्भेदे तु स्था
नोपविष्टायानीय समर्पयेत्॥तेनान्यसमर्पितेन होमः कार्यः॥स्रुग्भेदे आ
श्वलायनब्राह्मणे विशेषः॥यदि स्रुग्भिद्येत का तत्र प्रायश्चित्तिरि॥त्यऽ-
न्यां स्रुचमाहृत्य जुहुयादथैनां स्रुचं भिन्नां आहवनीयेऽभ्यादध्यात्प्रागदं
डाग्रस्रुक्पुष्करां सा तत्र प्रायश्चित्तिरिति॥स्रुच्युन्नीतस्या सर्वस्कंदने स्कंनं
स्याः स्कंन्नमित्यभिमर्शनं॥स्कंनस्योपर्युदकासेकः॥ परिशिष्टेन स्रुक्स्थे
॥८॥

नान्येनापि होमः कार्यः ॥ सर्वस्कंदने तु स्थाल्याः सकाशात् पुनरुन्नयनं ॥
यदि स्थाल्यामपि न स्यात्तदा यदन्यत्प्राप्नुयात्तत्सर्वेणाहवनीयमाहृत्याधिश्र
यणादिभिः संस्कृत्या प्रेषमुन्नीयाऽन्योऽस्मेसमर्पयेत् ॥ तेन जुहुयात् ॥ यदि
स्थाल्यामन्यत्स्यात्तदन्येनापि तेन यथाकथंचिदग्निहोत्रं जुहुयात् ॥ परि
शिष्टेन जुहुयादिति ॥ वचनादिति याज्ञिकाः ॥ तथा चापस्तंबः ॥ यदि हूयमा
नं दुग्धं ह्रियमाणं हृतमधिश्रयणमधिश्रितमुद्वासितमुन्नीयमानमुन्नीतं
वा स्कंदेत्तेदेव याहकृता० दृक होतव्यमन्यथा वाऽभिदोह्यमिति ॥ तदेव याव
त्तावद्धाच्यनाहुतिमात्रमपि होतव्यमन्या वा गोस्तस्योपरि दोहनीयाइति धू
र्तस्वामिनः ॥ परिशिष्टेन कार्यसमर्थेनेति त्रिंशांरवायनभाष्ये ॥ स्थाल्यां स्थस्य
सर्वस्य नाशे गवांतरदोहेऽग्निहोत्रीं धुक्ष्वेति प्रेषो भवत्येव ॥ लोपे वक्त्वना
भावात् ॥ पूर्वाहुत्यामेव सर्वस्योन्नीतस्य होमे रुतेन्याध्वर्यवं हुत्वा चतुर्ग
हीतेन संस्कृतं गृहीतेन वोत्तराहुतिः कार्याः ॥ द्वितीया कंडिका ॥ २ ॥ पूर्वाहुति
होमानंतरमाहवनीयानुगमनेऽजनादिष्टहोमार्थमाहवनीयमुद्धृत्य तेऽन्ता

॥९॥ पुनरुद्धृत्योत्तराहुतिं जुहुयात्॥ अथवा पूर्वाहुत्यनंतरमाहवनीयोपशमे आह-
वनीयसमीपे य[illegible]त्काष्ठपुतितं भवति तदाहवनीयस्थाने निधाय हिरण्यवान्नि-
धाय तस्योपर्युत्तराहुतिहोमः कार्यः॥ काष्ठहोमे क्रियमाणे यदि यजमानस्य
हृदये असंतोषो भवेत्तदा हिरण्ये होमः कार्यः॥ अत्राध्वर्यवाभावेः॥ उत्तरा-
५न हुतेरूर्ध्वमप्याहवनीयानुगमने मुख्यस्याध्वर्यूवं कृत्वा पुनरुद्धृत्याग्निहोत्रं
जुहुयात्॥ एवमेवाध्वर्युपूर्वकं वारत्रयमुद्धरेत्॥ यदि त्रिवारमप्युद्धृत आ-
हवनीयोनुगच्छेत्तदा गार्हपत्यसमारोह्य पूर्वेभ्योग्निस्थानेभ्य उत्तरस्मि-
न्प्रदेशेग्निनां गार्हपत्याहवनीयदक्षिणाग्नीनां स्थानानि कृत्वा पंचभूसं-
स्कारैः संस्कृत्य गार्हपत्यं निर्मथ्य स्वस्थाने स्थापयित्वा आहवनीयोद्धरणं॥
पूर्वाहुतस्यैव दक्षिणाग्नेरुद्धरणं॥ एवं सायंहोमाद्यूर्ध्वतः एवं तस्मि-
न्विहारे सायंप्रातर्होमं केचिदाचार्या इच्छंति॥ केचित्प्रातर्होमार्थं पुनरुद्धरं-
ति प्रातश्चान्तिमिन्नंतदा तत्रोदकस्थानस्थे विहारे प्रातर्होममात्रं॥ अथवा
त्रिरुद्धृतानुगमने एकेउक्स्थानाप्युपलिप्येत्यादि प्रायश्चित्तं कुर्वंति॥ एके ॥९॥

त्रातकृत्वोप्युद्धरंति॥ अग्निहोत्रविहारकाले गार्हपत्यानुगमने यस्मिन्काष्ठे
गोमयपिंडे वाग्निरुपशांतस्तदीयेन भस्मनारणीस्पृष्ट्वा मंथनं कार्यमि
ति कर्कसंप्रदायो॥ अन्ये तु सर्वदा गार्हपत्यनाशने एतन्नवतीत्याहुः॥ अग्निना
शाभ्रांत्या मथितेग्नौ पूर्वाग्निर्दृष्टो नि मथितं समारोप्य पूर्वाग्नौ होमः कार्यः॥ जा
तेग्नावरणिस्थे मंथनं येन च विमोकः कृते प्राक्स्थापनादुपशांते पुनराधेयमि
ति मंडनः॥ सर्वस्य गार्हपत्यास्याहवनीयस्थाने भ्रांत्योद्धरणे कृते पंचभूसं
स्कारपूर्वकं तं गार्हपत्यस्थाने स्थापयित्वा प्रायश्चित्तहोमार्थं दक्षिणाग्निपू
र्वकमाहवनीयमुद्धृत्याध्वर्युर्वं हुत्वाग्निहोत्रार्थमाहवनीयदक्षिणाग्न्योरुद्ध
रणं कुर्यात्॥ दक्षिणाग्निस्थाने सर्वोद्धरणे प्येवं॥ इष्टिपश्वादिष्वपि सर्वोद्धर
णे एतदेव ज्ञेयमिति कं॥ सर्वस्याहवनीयस्योल्मुकादूहने कृते पितृस्वस्थाने त्रा
११ वं नीयाध्वर्युः स्थित्वा पुनरुदूहनं कार्यं॥ सर्वस्याहवनीयस्य पशुश्रपणार्थं नयने
प्येवं सर्वस्याग्नीध्रीयस्योपयद्धोमार्थं होतृधिष्ण्ये स्थापने प्येवं॥ एवं चैकदेशा
नयने विहिते सर्वनयने कृते ज्ञेयः॥ ॥उल्मुकयोर्विद्यमानयोराहवनीयानुगमने
तयोरनुयाजार्थं त्वाग्गार्हपत्यादेवाहवनीयस्योद्धरणं नोल्मुकाभ्यां उल्मुकनाशे

॥१०॥
चानादिष्टहोमपूर्वकमुद्धरनं॥ गृहीतानुगमनप्रायश्चित्तंप्रागंत्यानुयाजादुत्त्मु
कोद्धरनंकृत्वासमासंकुर्यात्॥ उर्ध्वत्वाध्वर्यवमेवसमासविस्मरणेच॥ ततः प्र
भृतिअग्निहोत्रविषयाप्रायश्चित्तानि॥ आहवनीयेविद्यमानेगार्हपत्यस्यो
नी० पशमनेआहवनीयात्प्राच्यांदिशिहोमार्थमुद्धरणंकार्यंसिश्चआहवनीयः॥ पश्चा
दाहवनीयस्थाने ऽवशिष्टः सगार्हपत्यः॥ पूर्वोद्धृतएवदक्षिणाग्निराहृत्यवि
हृतीयस्थाप्यः॥ एवंकृत्वाग्निहोत्रंहोतव्यं॥ होमान्तेगार्हपत्यस्यमंथनंकार्यं॥
यस्याग्निहोत्रेआहुतेःपरोग्निरनुगच्छेदनुगमप्यपूर्वमपरस्मान्मथित्वा
प्रणयेद्यदिहरेत्ततत्तएवप्रावमुध्धत्यदक्षिणाग्निमन्वानीयत्मानंप्रात्तर्जुहु
९ वा यादितिमानवे॥१॥ अथसंकल्प्यमप्याहवनीयगार्हपत्यस्थानेआहृत्यततो
एवगार्हपत्यस्थानेआहृताग्नेःपुनराहवनीयस्योद्धरणंकार्यं॥ होमान्तेच
गार्हपत्यस्यमंथनं॥२॥ अथवात्वणवस्योज्वलंत्यागार्हपत्यस्थानेआहवनीय
पूर्वोद्धितमाहवनीयखरस्थमाहवनीयंपरित्यज्यगार्हपत्यखरस्थादग्नेः
सकाशात्पुनराहवनीयमुद्धृत्याग्निहोत्रंहोतव्यं॥ होमान्तेगार्हपत्यस्यमंथनं
॥३॥ अथवागार्हपत्यंनिर्मथ्यततउद्धरणंकार्यं॥४॥ अत्रप्रकारद्वयं॥ पूर्व
॥१०॥

माहवनीयंसमारोह्य ॥ ३ समारोह्य वा मंथनं कार्यं ॥ तत्र ३ समारोपपक्षे पूर्वं आह
वनीयमुपविश्राम्य गार्हपत्यं निर्मथ्य स्वस्थाने एवं संस्थाप्य स्वस्थान एवाहव
नीयमुद्धरेत् ॥ दक्षिणाग्निः पूर्वेद्युः तत एव ॥ एवं विहारे ग्निहोत्र होमः ॥ समारोह्य
वेति पक्षे तु आहवनीयं समारोह्योदकस्थानानुपलिप्य निर्मथ्य सकृदुद्धृते तस्मि
न्विहारे सायंप्रातर्होमः ॥ दक्षिणाग्निः पूर्वेद्युः तत एव ३ उद्धीयते प्रायश्चित्तनिमित्तं तदा
प्रातर्होम एव केवलं सूत्र अस्मिन्पक्षे सायमेतत्कृत्वा प्रातःकाले ग्निहोत्र होमानंत
रं स्वस्त्रेभ्यः पूर्वेभ्यो ग्निस्थानेभ्यो भस्मोद्धरणं ॥ गोमयेन तेषां स्थापनानामुपले
पनं ॥ पंचभूसंस्काराः ॥ अरण्योरग्नी समारोह्योत्तरस्मात्स्थानात् स्वस्थाने प्र
स्थागमनं ॥ गार्हपत्यस्य मंथनं ॥ खरे स्थापनं ॥ पथिकृदिष्ट्यर्थमाहवनीयोद्धर
णं ॥ दक्षिणाग्नेराहरणं ॥ ततोग्नये पथिकृतेष्टाकपालः पुरोडाशो ग्न्यन्वाधा
नादिकर्मापवर्गांतः ॥ आहवनीये विद्यमाने गार्हपत्योपशमे समारोह्य मंथनं
पक्षे एतावत्प्रायश्चित्तं ॥ पथिकृदिष्टिर्निरूप्यते ॥ ग्रहणे अग्नये पथिकृते जुष्टं ॥
प्रोक्षणे अग्नये पथिकृते त्वा जुष्टं ॥ प्राणदाने ग्निपथिकृतं गृह्य ॥ प्रैषे ग्नये पथि
कृते नु ब्रूहि ॥ अग्निं पथिकृतं यज ॥ स्यागे इदमग्नये पथिकृते ॥ अन्वाहार्ये दक्षिणा ॥

हि

॥११॥ अग्नेः पथिकृत उज्जितिं ॥ अग्निः पथिकृत्तमपनुदं तु ॥ प्राशित्रे आषड्वत्तब्रलय
जमानभागचतुर्द्धाकरणानि भवंति ॥ ॥ होत्रे पित्रे षोत्तिख्यते ॥ अत पथाभिप्रा
येण सप्तदश सामिधेन्यः ॥ वार्त्रघ्नावाज्यभागौ ॥ अग्निं पथिकृतमाश्वह ॥ स्वाहा
ग्निं स्वाहा सोमं स्वाहाग्निं पथिकृतं स्वाहा देवा इत्यादि ॥ अग्निर्वृत्राणि त्वं सोमासी
न्याज्यभागयोः पुरोनुवाक्ये ॥ वेत्था हि वेधइ ति प्रधानयागे पुरोनुवाक्या ॥ ये॰ हे
ग्निं पथिकृतमा देवानामपि पंथामिति याज्या ॥ प्रेद्धो अग्न इमो अग्न इति वि
राजौ संयाज्ये ॥ अयाडग्नीमस्य प्रिया धामान्ययाडग्नेः पथिकृतः प्रिया धामान्य
यादेवानामित्यादि ॥ अग्निः पा थिकृद्धविरजुषतावीवृधत महोज्यायो कृ
नेति विशेषः ॥ आश्वलायनमते स्विष्टकृति प्राकृत्यो याज्यानुवाक्ये अन्यत्समा
नं ॥ अथ वा मंथनपक्षे त्रयः पक्षाः ॥ गार्हपत्यं निर्मथ्य स्वस्थाने स्थापयेत् ॥
पूर्वाध्वतावेवाहवनीयदक्षिणाग्नी ता. तोग्निहोत्रहोम इत्येकः पक्षः ॥ अ
स्मिंश्च पक्षे न्यायप्राप्तमेवैतदित्याध्वर्यव होमो भवतीति कर्के ॥ नेति श्रीअ
नंतयाज्ञिकाः ॥ प्रामस्येव पुनर्विधानं प्रायश्चित्तं व्यूदार्थं मतः ॥ इत्तरेप ॥१९

क्षोपूर्ववत्॥ केचिदुत्तरयोरुभयोरपि पक्षयोः पूर्ववद्धोमो भवतीति व्याचक्ष
ते॥ अ[illegible]न्योरग्नीसमारोहोयत्र हरिस्वामिव्याख्याने॥ गार्हपत्यस्तावदर
ण्योरारूढएव॥ अरणीवावमगच्छतीति वचनात्॥ आहवनीयेसमारोपितेउ
भौसमारोपितौभवतस्तनश्चारण्योस्तमाहवनीयंसमारोप्येत्यर्थः॥ अथवो
भावपितत्रैवेदानींवर्त्तेते इति न तत्समारोपणेनोभौसमारोपितौ भवतः॥ नत
श्चारण्योरग्नीइत्यनदुपपद्यते॥ यदिगार्हपत्यादाहृतेनोदक्षिणाग्निग्घोमाद्ध
छेत्तदाध्वर्यवहोमार्थं दक्षिणाग्निमाहृत्याध्वर्यवंहुत्वागार्हपत्यासुनरग्नि
होत्रार्थंआहरेत्॥ यदिपुनराहृत्यपुनरनुगच्छेत्योन्वानेवमेवाहरेत्॥ य
दिग्निवौरमाहृतोपिपुनरनुगच्छेत्॥ तदातस्मिन्नहन्येकेआचार्यादक्षि
णाग्नेराहरणेनक्रियतएवेत्याहुः॥ तदादक्षिणाग्निहोमलोपस्तत्साध्यत्वा
त्॥ एकेत्वानलत्वोप्याहरेति॥ दक्षिणासंहृतोदक्षिणाश्चेदुपशांतस्तदायेन
प्रकारेणनिर्मथनेनैवत्र्यकुण्डंनेरीषादिनो आधानसमयेसंपादितस्तेनैवा
त्रापिसंपादनीयः॥ नित्यधारित्वपक्षेयदिगार्हपत्यादयोग्नयोनुगच्छेयुस्त

दाध्वर्यवहोमपूर्वकमेकैकस्यस्वयोनेराहरणं॥आहवनीयजागरणेवेत्यादि
प्रायश्चित्तमपिनित्यधारित्वपक्षेनभवति॥धारणेन्वपरार्थत्वादितिजैमिनि
नानिरस्तत्वात्॥दर्शपूर्णमासाद्यर्थमुद्धृतेष्वग्निहोत्रविहारकालेनुगतेष्वपि
नैतेपक्षाः॥किंतुगृहीतोनुगमनेचान्वग्निरित्याहृत्यसमितिद्वाभ्यामुपतिष्ठे
दित्येतदेवभवति॥अग्निहोत्रार्थोद्धरणकालादन्यस्मिन्कालेगार्हपत्यानुगम
नेतंमथित्वासंस्थाप्याध्वर्यवहोमार्थंदक्षिणाग्निपूर्वकमाहवनीयमुद्धृत्याध्व
र्यवंजुहुयात्॥तदाहकारिकाकारः॥विहारकालादन्यत्रयदानयोनुगच्छति॥
मथित्वानयमुद्धृत्याऽनादिष्टंतत्रहूयतइति॥ ॥यदिजाग्रतमनुपश्यन्तमाहव
नीयमुपशान्तमभ्यास्यापुनर्गार्हपत्यादेवोद्धरेत्॥तदाध्वर्यवंहुत्वाभ्यास्योद्धृतस्य
गार्हपत्यमध्येपश्चात्प्रक्षेपःकार्यः॥अथसंकल्पदोषदुष्टोयमग्निरित्येवंबु
द्धिश्चेत्तदारंदप्रायश्चित्तंकुर्यात्॥तंभ्रांत्योद्धृतंपूर्वोद्धृतस्याहवनीयस्यपश्चा
त्पुरस्ताद्वास्थापयित्वाऽभयत्राग्निद्वयेपिहोमंकुर्यात्॥तत्रैवंकर्तव्यं॥स्वा
नवंतीप्रणात्निकासहस्रीपूर्वासमिधमादायएकमेवचतुर्गृहीतंतत्स्यासमि

ध्रिन्नुथा होतव्यं यथाहुतं द्रव्यं उभयोरग्न्योः प्राग्नोऽस्येव मुभयत्र होमः स्रुतो भवति॥
अस्येव भ्रांत्योऽहुतस्याग्नेः पूर्वाहवनीयस्योपरि निधाने रुते अग्नये ग्निमते ष्टा
कपालः पुरोडाशो भवति॥तस्मिन्नेव विहारे अग्निहोत्रांगत्वात्॥अग्नये ग्निम
ते जुष्टं गृण्हामि॥अग्निमते त्वा जुष्टं प्रोक्षामि॥अग्निमग्निमं तं गछ॥अग्नये ग्नि
मते नुब्रूहि॥अग्निमग्निमं तं यज॥इमग्नये ग्निमते॥प्राशित्रेडाषडवत्तं ब्रह्म
यजमाने भागश्चतुर्द्धाकरणानि भवंति॥अन्वाहार्यो दक्षिणा॥अग्नेरग्निमत्त
उज्जितिं॥अग्निरग्निमांस्तमपनुदंत्विति॥होत्रे तु विशेषः॥सप्तदशसामि
धेन्यः॥अग्निमग्निमं तं मावह स्वाहाग्निमग्निमंतं स्वाहा देवाइत्यादि॥वार्त्र
घ्नावाज्यभागौ॥अग्निनाग्निः समिध्यत इति प्रधानस्य पुरोनुवाक्या॥ये ३ य
जामहे ग्निमग्निमंतं त्वं ह्यग्ने अग्निनेति याज्या॥प्रेषो अग्नेइमो अग्नइति वि
राजौ॥स्विष्टकृतो याज्यानुवाक्ये अपाव्यग्नेरग्निमतः प्रिया धामानीति विशे
षः॥अग्निरग्निमान्हविरजुषतेति सूक्तवाके॥शांखायने॥अग्निमग्निह

वीमभिरितिपुरोनुवाक्या॥अग्निनाग्निः समिध्यत इतियाज्या॥पित्री हि देवा
निमे अग्न इत्यते स्विष्टकृतो याज्यानुवाक्ये कर्मापवर्गे तु सर्वप्रकृतिवत्॥
समासयाभिष्याग्निहोत्रहोमः॥द्रव्यकालर्त्विगाद्यभावेनेष्टिं कर्तुमसमर्थ
स्य हृद्विलेखरहितस्य चास्मिन्निमित्ते इदं प्रायश्चित्तांतरमुच्यते॥अ
ग्नेरूर्ण्येग्निनिधाने भ्रासावृते समितत्र संकल्प्येथा॥संवां मनांसीति द्वा
[redacted] भ्यां मभ्यां नयोरग्न्योरुपस्थानं वा कुर्यात्॥हृद्विलेखे यजमानस्य
चित्ते लघुना प्रायश्चित्तेनासंतोषे पूर्वोक्तामिष्टिं कुर्यात्॥हृद्विलेखाद्यभा रवा ७
वे द्रव्याद्यभावे चोपस्थानमिति व्यवस्थितो विकल्पः॥दक्षिणाग्नेरभ्य
द्धरणेपीदमेव प्रायश्चित्तं सामान्येनोक्तत्वात्॥अग्न्यन्वाधानानंतरं य
दि गार्हपत्याहवनीयदक्षिणाग्निनामध्येकश्चिदनुगच्छेत्तदा अन्व
ग्निरूषस इति मंत्रेणानुगतमग्निं स्वयोनितआहृत्य पूर्वोक्तमुपस्था
नरूपप्रायश्चित्तद्वयं विकल्पेन कुर्यात्॥तत्र हृद्विलेखे भग्नयेग्निमते ष्टिः॥

हृद्दिङ्लेखाभावेद्रव्यकाल्लवञ्चाद्युभावेचसमितिद्वाभ्यांमृगभ्यापुनराहृतस्याग्ने
रुपस्थानंकुर्यादितिनैव्यवस्थितोविकल्पः॥गार्हपत्यानुगमेपितस्यजातस्या
३ रा॥ श्रेणःस्वकालस्थापनार्थस्वरंप्रत्याहरणमन्वग्निरितिमंत्रेणभवति॥आहवनीयस्य
प्रक्रमात्तदनुगमेऽन्वग्निरित्याहृत्यसमपिसमितमितिद्वाभ्यामुपस्थानं॥गार्हपत्याद
क्षिणाग्न्योरनुगमेचा॥नादिष्टमितिवासुदेवः॥यद्यन्वाहिताग्नेराहवनीयोनुगच्छे
दन्वग्निरुषसामित्यन्यंप्रणयेत्यादि॥गृहीतानुगमनेचेतिचकारेणपूर्वसूत्रोक्तमु
पस्थानमेवानुस्थतेनव्यवहिताग्नयेग्निमंतेपुरोडाशइतिश्रीअनंतयाज्ञिकाः॥
एतदप्ययुक्ततरं॥अस्मिन्निमित्तेप्रायश्चित्तांतरसूत्रेस्येष्टेरदर्शनात्॥अग्न्यन्वाधा
नोत्तरकालंगार्हपत्योपशाममंथनेनैवभवतिनप्रागुक्ताहवनीयजागरणेनेत्यादि
पक्षः॥प्रासंगिकंप्रायश्चित्तंनिविद्यतेपरार्थत्वादितिजैमिनिनानिराकृतत्वात्॥यदि
गार्हपत्यस्यमंथनेक्रियमाणेहोमकालातिक्रमोभवतितदातन्निमित्तमहुताभ्युदित
उन्नीयात्तमितारासीतित्यादिप्रायश्चित्तंकृत्वाग्निहोत्रंजुहुयात्॥नतुगार्हपत्यस्यप्रका
रांतरेणसंपादनमितिकेचित्॥अपरेतुमंथ्यमानश्चेन्नजायतेयमदूरासेरापश्यंत्तमा

हुत्वाभिजुहुयादित्यादितोपायनगार्हपत्यसंपाद्याहवनीयदक्षिणाग्न्यनुगमे च तावपि न
त एव विहृत्याग्निहोत्रं हुत्वा होमान्ते मंथनं कृत्वा गृहीतानुगमनप्रायश्चित्तं कृत्वेष्टिं कुर्व
न्ति॥ युक्तं चैतत्॥ होमकालानुरोधनात्॥ ॥कृताग्न्यन्वाधानस्याहवनीयस्योपशान्तस्य स्या
मयादुदयाद्वा प्रागनुद्धरणे पि अनुद्धृताभ्यस्तमये अभ्युदये वा हिरण्यरजतधारणे
पश्चात्पुरस्तादित्येषु तत्प्रायश्चित्तं न भवति॥ अग्निहोत्र आसनेषु नेत्रात्रेषु आहवनीया
नुगच्छेदित्येन तदपि प्रायश्चित्तमिष्ट्यर्थमुक्तं तेषु अस्मिन्काले उपशान्तेषु न भवति॥
अग्निहोत्रद्रव्यकृतत्वात्॥ ॥अग्निहोत्रांगभूतास्विष्टिषु क्रियमाणास्वग्न्यन्वाधा
नोत्तरकालमग्नीनामनुगमने च गृहीतानुगमने न प्रायश्चित्तं न भवति॥ किं त्वनादिष्ट
मात्रं कृत्वोपशान्तस्य पुनः स्वयोनेराहरणं भवति॥ तदुक्तं कारिकायां॥ अग्निहो
त्रांगभूतेष्टिमध्येग्न्यनुगमो यदि॥ गृहीतानुगमो न स्यादाधानेष्टिवदत्र तु॥ सा
धारणं यतश्चेहाग्नेर्येनुस्यात्सौर्णमासवत्॥ न ह्युद्धरणमिष्ट्यर्थं किं तु होमार्थमेव
तत्॥ तस्माद्यथातिथेर्होमकालीनस्य भुजिक्रिया॥ नाग्निहोत्रांगमेवं न गृहीता
नुगमस्त्विह॥ किं त्वनादिष्टमात्रेण पुनरुद्धरणं भवेदिति॥ अत्राग्निमदिष्टिपक्षात्र

यणेवक्ष्यमाणपंचशरावव्रतकर्मकर्त्तव्यं॥अनुद्धृतेआहवनीयेसूर्यस्यास्तमयेयज
मानःकांचनप्रतिहरितं हिरण्यंदर्भेप्रबध्ययपश्चाद्धर्त्तवाइतिप्रेष्यति॥संप्रेषितःसु
वर्णंदर्भेबध्वागार्हपत्यस्यपश्चाद्धारयति॥अथयजमानोऽन्यंकृषिसाहृत्वाबहुज्ञं
ब्राह्मणंप्रेष्यति॥इध्ममादायप्राचऽहर्त्तवाइति॥सब्राह्मणोऽष्टाविंशतिप्रभृति
काष्ठकमिध्मंत्रिवृन्नबध्यअग्नेर्गार्हपत्येदीप्तंकृत्वोद्यम्यप्रांचमुद्धृत्याहवनीय
स्थलेस्थापयति॥ततःप्रस्यागत्याज्यस्थाल्यामाज्यंनिरूप्यगार्हपत्येधिश्रि
त्यस्रुवंचस्रुचंचसंमृज्योद्वास्योत्पूयावेक्ष्यचतुर्गृहीतमाज्यंगृहीत्वासमिध
मुपसंगृह्याहवनीयंप्रतिगत्वाहवनीयंपरिस्तीर्यसमिधमादायोपविश्यदक्षि
णंजान्वाच्यविधमवेस्वाहेतिजुहोति॥सर्वकृद्धीत्तेनयमाहुतिरितिघोषणाप्रा
यश्चित्तकारिकाकारो॥ततोदक्षिणाग्नेरुद्धरणं॥ततस्तस्मिन्नेवविहारेअग्न
येसूर्यवतेपुरोडाशोऽष्टाकपालः॥तत्रविशेषः॥अग्नयेसूर्यवतेजुष्टं॥प्रोक्षणे
अग्नयेसूर्यवतेत्वाजुष्टं॥अग्निंसूर्यवंतंगच्छ॥अग्नयेसूर्यवतेनुब्रूहि॥अग्निं
सूर्यवंतंयज॥इदमग्नयेसूर्यवते॥प्राशित्रचतुर्द्धाकरणादिसर्वंभवति॥अन्वा

॥१२५॥

हार्येद् दक्षिणा॥ अग्नेः सूर्यवत उज्जितिं अग्निः सूर्यवांस्तमपनुदं त्विति॥ इष्ट्या
तेन द्विहार एवाग्निहोत्रहोमः॥ विहारस्याग्निहोत्रहोमार्थत्वात्॥ अत्र होत्रं॥
सप्तदश सामिधेन्यः॥ आवाहने अग्निं सूर्यवंतमावह॥ स्वाहाग्निं सूर्यवंतं॥
वार्त्रघ्नावाज्यभागौ॥ उदु त्यं जातवेदसमिति पुरोनुवाक्या॥ ये यजामहे ग्निं सूर्य
वंतं चित्रं देवानामुदगादिति याज्या॥ प्राकृतः स्विष्टकृत्॥ अयाडग्नेः सूर्यवंतः
प्रिया धामानीति विशेषः॥ अग्निः सूर्यवान् हविरजुषतावीवृधत महो ज्यायो
ऽकृतेति च॥ अथ वा विश्वेभ्यो देवेभ्यः स्वाहेति मंत्रेण चतुर्गृहीतमाज्यं जुहुया
त्॥ न विष्णवे स्वाहेति अस्मिन् पक्षे इष्टिर्न भवति॥ स चाश्वलायनोक्तः केवलो वैश्व
देव्याहुतिरेव भवति॥ अनुद्धृते हवनीये सूर्योदयस्योजाते यजमानो रजतं
हिरण्यं दर्भे प्रबध्य पुरस्तादुद्धर्तवा इति कंचित् प्रेष्यति॥ स प्रेषितो रजतं दर्भे ब
द्ध्वा आहवनीयखरात् पूर्वस्यां दिशि धारयति॥ ततो यजमान एव ऋषिसह
त्रं बृहद्विदं आलणं प्रतिप्रेष्यति॥ इध्ममादीप्यान्वंच ५ हर्तवा इति स एवं प्रेषितो
ष्टा विशति काष्ठमिध्मं चियून बध्वं गार्हपत्यस्याग्नेर्दीप्तं स्तोत्रस्य पूर्वस्यां दिशि ध

॥१२५॥

तंरजतंमनुलक्षीकृत्वान्वंचंरजतानुगामिनंहृत्वाहवनीयस्वरेस्थापयति ॥ ततः
प्रयागस्यपूर्ववदाज्यंसंस्कृत्यचतुर्गृहीतंहुत्वासमिधमुपसंगृह्योछायायाहवनीय
समीपेगत्वापरिस्तरणपूर्वकमाहवनीयेसमिधमादायदक्षिणंजान्वाच्यविश्वे
भ्योदेवेभ्यःस्वाहेतिमंत्रेणचतुर्गृहीतमाज्यंजुहुयात् ॥ ततस्तस्मिन्नेवविहारे
सूर्यायज्योतिष्मतेष्टाकपालःपुरोडाशोग्न्यन्वाधानादिकर्मापवर्गांतःप्रकृतिवद्भ
वति ॥ तत्रविशेषग्रहणे ॥ सूर्यायज्योतिष्मतेजुष्टं ॥ प्रोक्षणे ॥ सूर्यायज्योतिष्मते
त्वाजुष्टं ॥ सूर्यंज्योतिष्मंतंगछ ॥ सूर्यायज्योतिष्मतेनुब्रूहि ॥ सूर्यंज्योतिष्मंतंयज ॥
प्राशित्रादिसर्वं ॥ अन्वाहार्योदक्षिणा ॥ सूर्यस्यज्योतिष्मतउज्जितिं ॥ सूर्योज्योतिष्मा
स्तमपनुदत्विति ॥ अत्रहोत्रं ॥ सेतदत्रासामिधेन्यः ॥ सूर्यंज्योतिष्मंतमावहस्वाहा
सूर्यंज्योतिष्मंतंस्वाहादेवा ॥ वार्त्रघ्नावाज्यभागौ ॥ प्रधानयागे ॥ तरणिर्विश्वदर्श
तइतिपुरोनुवाक्या ॥ येयजामहेसूर्यंज्योतिष्मंतंबृहत्सूर्यश्रवसामहानितिया
ज्या ॥ प्रावृतःस्विष्टकृत् ॥ अथवाकेवलोवैश्वदेव्याहुतिरेवभवति ॥ स्वशाखो
क्तो ॥ नसूर्यायज्योतिष्मतइष्टिः ॥ ततस्तद्विहारएवप्रातरग्निहोत्रहोमः ॥

॥१८॥ पा आश्वलायनब्राह्मणे॥तदाहुर्यस्याग्निमनुद्धृतमादित्योभ्युदितमयाद
स्तमियाद्वाप्रणीतोवाप्राग्घोमादुपशाम्येत्कातत्रप्रायश्चित्तिरितिहिरण्यं
पुरस्कृत्सायमुद्धरेज्ज्योतिर्वैशुक्रंहिरण्यंज्योतिःशुक्रमसौतदेवत॥ज्यो
तिःशुक्रंपश्यन्नुद्धरति॥रजतमंतर्धायप्रातरुद्धरेत्॥एतद्वात्रिरूपंपुरस्तासं
भेदाच्छायानामाहवनीयमुद्धरेदिति॥तेनोद्धृतस्योपशमेपुनरुद्धरणमपि
सार्वांतरीयंपुरस्तादुद्धृतहिरण्यधारणंभवत्येवाहवनीयोद्धरणानंतरं
उभयोर्गार्हपत्याहवनीययोरनुगमनंप्रागस्तमयात्तायेत्तेतदागार्हपत्यंमथि
त्वाध्वर्युर्वंहुत्वानस्तमितेभ्युदितेवापुनरुद्धृत्यहोमःकार्यः॥मथ्यमानस्य
जननासंभवेचयमद्वरासरापत्येयदित्यादिनोपायेनगार्हपत्यस्थानेलौकि
काग्न्यादिकंस्थापयित्वाऽनस्तमितानुदितायोरेवतस्मादाहवनीयमुद्धृत्य
जुहुयात्॥एतयोरुभययोर्मध्येयदिएकोपिनष्टः॥उभयोरनुगमस्तो
नोत्तरकालेसूर्यस्यास्तमयोभ्युदयोवायदिभवतितदापुनराधेयंप्रायश्चित्तंभवति॥

॥१८॥

एतच्चाग्न्योरनुगमनज्ञानानंतरमस्तमयोदयेसतिभवतिनास्तमयोदयानंतर
मग्न्योरनुगमनपरिज्ञाने॥तथाच मंडनः॥उभयोर्नाशविज्ञानादूर्ध्वमर्कोस्त
मेतिचेत्॥कर्कोग्निनाशमाचष्टेपश्चाज्ज्ञातेपिनेष्यति॥अग्निहोत्रार्थमुद्धृते
ष्वेवतत्प्रायश्चित्तंनेष्टिपशुसोमाद्यर्थमुद्धृतेषु॥तथैवशास्त्रांतरेश्रवणात्॥
तथाचत्रिकांडमंडनः॥अन्वाहितोभयध्वंसेप्यग्निनाशोनविद्यते॥अन्वाहित
विधिःकार्योहव्यवाहद्वयेपृथगिति॥आश्वलायनब्राह्मणे॥यस्यसर्वएवाग्न
येउपशाम्येरन्कातत्रप्रायश्चित्तिरितिसोग्नयेतपस्वतेजनद्वतेपावकवतेष्टा
कपालंपुरोडाशंनिर्वपेत्तस्ययाज्यानुवाक्येअपाहितपसाजनेष्वानोयाहित
पसाजनेष्वित्याहुतिंवाहवनीयेग्नयेतपस्वतेजनद्वतेपावकवतेस्वाहेति॥एक
स्याहवनीयस्यानुगमनेज्ञातेउभयेभ्योस्तमयेत्वेधनोद्धरणादिभवति॥ए
कस्यगार्हपत्यस्यानुगमनेआहवनीयजागरणेवेत्यादि॥उभयोर्युगपदनुग
मनज्ञानानंतरमुदयेभ्यस्तमयेवापुनराधेयंभवति॥तत्रापिकेचित्पुनरा
धेयंचापुनराधानंवेतिविकल्पमाहुः॥केचित्पुनराधेयमेवेतिनिर्द्धारणंकुर्वंति॥

॥१९७॥ उद्यास्तमयात्प्रागाहवनीयस्यानुगमे चाध्वर्यवपूर्वकं गार्हपत्यादुद्धरणं ॥ तत
उर्ध्वमपिहोमारंभात्प्रागेवमेव ॥ कूर्चासादनोत्तरकाले प्राग्घोमा[redacted]दग्नि
होत्रअसन्नेषु चेत्यादि ॥ पूर्वाहुते नंतरं पूर्वाहुतिहुतायां चेदित्यादि पक्षत्रयं ॥
उत्तराहुतिंउर्ध्वमप्येवमेवान्यस्यानुक्तत्वात् ॥ दक्षिणाग्नेरप्येवमेव ॥ पुनराधे
येध्मवर्जंसमानन्यायात् ॥ ॥अथ पुनराधेयस्य पदार्थक्रमोलिख्यते ॥ ॥
उभयानुगमननिमित्ते पूर्ववद्दक्षिणाग्नेरुत्सर्गः ॥ एतन्निमित्तं पुनराधेयमहं क
रिष्ये ॥ तत्र मेत्वमित्यृत्विग्वरणं ॥ नाग्न्यगारकरणं विद्यमानत्वात् ॥ वपनं वा ॥ अ
हतक्षौमपरिधानं पत्नीयजमानयोः ॥ गार्हपत्यस्थाने उ बरीषाद्यग्निस्थापनं ॥
देवाः पितर इतिजपः ॥ पूर्वद्वारेण यजमानस्य प्रवेशनं ॥ दक्षिणेन पत्न्याः स्थापित
स्याग्नेः पश्चादुभयोरुपवेशनं ॥ अरणिप्रदानाभावः ॥ गार्हपत्यागारे उ जवंधनं
वा ॥ वातुष्प्राश्यं वा ॥ अग्न्युपशमनं ॥ वाचंयच्छेति प्रेषः ॥ गार्हपत्यादीनामायतन
संस्कारः ॥ पक्षसंभाराः ॥ संभारेभ्यः प्राक् श्रौतोल्लेखनांते अर्कपर्णाभ्यां कपालस्था
नीयाभ्यां लौकिकाग्निभ्रष्टस्य प्रज्ञाहिमयापूपस्य गार्हपत्यस्थाने स्थापनं ॥ ततोन्वा

॥१९७॥

रथ्येश्रोताभ्युक्षणादिव्रार्करांतं एवमाहवनीयस्थानेपिश्रोतोल्लेखनानंतरं यव
मयस्यापूपस्यार्कपर्णाभ्यां कपालस्थानीयाभ्यां लौकिकाग्निनाभ्रष्टस्य स्थापनं॥
ततोन्वारब्धेश्रोताभ्युक्षणादिव्रार्करांतं॥ सभ्यस्थानेनमस्कारः॥ सभ्यस्य विद्यमा
नत्वात्॥ अश्वमानयेतिप्रैषः॥ मंथनं॥ जातेवरदानं॥ अभिश्वासः॥ उद्धासोन भव
ति॥ कुर्चौर्ध्वज्वलतो गार्हपत्यस्य स्थापनं॥ सामगानं वा॥ इध्मस्थाने कुर्चे रेवज्वल
द्भिराहवनीयस्योद्धरणं॥ अश्वः पुरस्तादग्रतोगच्छति॥ यजमानस्य धूमानुगमनं॥
संभाराधिष्ठापनाद्याहवनीयाधानांतं॥ इध्मपूर्वाज्यान्वारंभणसार्पराज्ञीनां विक
ल्पः॥ दक्षिणाग्नेः स्थापनं॥ सभ्यस्य मंथनं स्थापनं च न भवति॥ तृणादीन्यश्वमि
तिप्रैषः॥ नद्यूतं॥ परीत्याश्वस्योत्सर्गः॥ पूर्णाहुतिः॥ अग्निहोत्रहोमः॥ तनूहवि
षांस्थाने एकाआग्नेयीष्टिः॥ अत्रोत्तमानुयाजवर्जमन्यत्सर्वमुपांशु भवति॥
पंचकपालः आग्नेयः पुरोडाशः॥ तत्राग्नेयजुष्टमित्यादिप्रवृत्तिवत्॥ विशेषः॥
प्रथमेप्रयाजेसमिधोयजेत्यस्य स्थाने विकल्पेनाग्नीन्यजेति प्रैषः॥ नित्यमि
तिकर्कः॥ तत्रशांखायनमते समिधोयजेत्येव॥ शतपथपक्षान्त्रयेग्नीन्यजेति॥ त
दाचइदमग्निभ्य इति प्रथमे त्यागः॥ तृतीयचाद्वितीयेचतुर्थयोरिदमग्नय इति॥

त्ति १

॥१२॥ द्यांरवायनमतेप्रैस्वस्यागः॥द्वितीयादिप्रयाजेषुयजेस्वेव॥उत्तमप्रयाजेइदमग्न
येपवमानायवाअग्नयइंदुमतेवाअग्नयेग्निभ्यआज्यपेभ्यइत्ति॥प्रथमआ
ज्यभागे॥अग्नयेनुब्रूह्यग्निंयजेत्येवंप्रैषो द्वितीयेत्वग्नयेपवमानायानुब्रू
हि॥अग्निंपवमानंयजेतिवा॥अग्नयइंदुमतेनुब्रूहि॥अग्निमिंदुमतंयजेति
वाइतिविकल्पद्वयं॥ततोग्नयेनुब्रूहि॥अग्निमंतेतिप्रधानयागे॥ततःस्विष्ट
कृदादिप्राशित्रादिसर्वंभवति॥दक्षिणायांहिरण्यंदक्षिणाअनड्वान्वा॥तत्रहि
रण्यमसि॥अनड्वानसीतिमंत्रेणऊहः॥प्रथमानुयाजेअग्नीन्यजेतिप्रैषोदेवान्य
जेतिवा॥द्वितीयतृतीययोःप्रकृतिवत्॥उत्तमोनुयाजउक्तः॥इदमग्निभ्यइति
त्यागः॥अग्नीन्यजेतिप्रैषपक्षे॥पक्षांतरेतुप्रकृतिवत्त्यागः॥शेषंसर्वमुपांशु॥
ब्रह्मचर्यादयोनियमाभवत्येव॥तथाचकारिकायां॥अग्न्यगाराश्रानाघ्रासार
णिदानविवर्जितं॥सद्यःसर्वंभवेदेवंब्रह्मचर्यादयस्ततइति॥ततस्तस्मिन्नेव
विहारेग्निहोत्रादर्शपूर्णमासेष्ट्यादिसर्वंभवति॥उभयाग्न्यनुगमेइतरनिमि
त्तेपुनराधेयेविशेषः॥पुनराधेयादर्वाक्त्रिरात्रचतुरात्रपंचरात्राद्दोगार्हपत्या
हवनीयदक्षिणाग्नीनामुद्धस्योत्सर्गः॥अपूपवर्जितंपुनराधेयंसद्योग्नीनुत्सृज्या ३

रूपसहितं यथोक्तं पुनराधेयं कार्यं॥ संवत्सरं पराङ्गेमुत्सृष्टाग्निर्भवतीत्याप
स्तंब॥ अथ होत्रं ज्ञातपद्धेदृष्टं॥ पंचदशसामिधेन्यः॥ अवाहने॥ अग्निमग्न
आवह॥ अग्निं पवमानमावह॥ अग्निमिंदुमंतमिति वा॥ अग्निमावह॥ अ
ग्नीनाज्यपाना ३ वह॥ अग्निं होत्रायेत्यादि॥ प्रयाजेषु॥ ये ३ हे अग्न आज्यस्य
व्यंतु ३ वौ ३ सगित्ति प्रथमे॥ ये ३ हे ग्निमाज्यस्य वेतु ३ वौ सगित्ति द्वितीये॥ ये॰ हे
ग्निनाः थस्य व्यंतु ३ वौ ३ सगित्ति तृतीये॥ ये॰ हे ग्निराज्य वेतु ३ वौ सगित्ति चतु
र्थे॥ ये॰ हे स्वाहाग्निं स्वाहाग्निं पवमानं अथवा स्वाहाग्निमिंदुमंतं॥ स्वाहाग्निं
स्वाहाग्नीनाज्यपा जुषाणा॥ अग्निराज्यस्य वेतु ३ वौ ३ सगित्ति पंचमे॥ अग्नये
आज्यभागे॥ अग्निस्तोमेन बोधय॰ दधोमू॥ पुरोनुवाक्या॥ ये ३ हे ग्निं जुषाणो
अग्निराज्यस्य वेतु ३ वौषट्॥ द्वितीय आज्यभागे॥ अग्निः पवमानो देवता॥ तत्र अ
आ ग्नयूषि पवस॰ छुनो॥ इति पुरोनुवाक्या॥ ये ३ हे ग्निपवमानं जुषाणो अग्निः प
वमाने आज्यस्य वेतु ३ वौ ३ षूकु याज्या॥ अथवा द्वितीये आज्यभागे॥ अग्नि
रिंदुमां देवता॥ तत्र एह्यूषुब्रवाणि ते॰ दुंभो ३ पुरोनु॰ ३ ये ३ हे ग्निमिंदुमंतं जु
षाणो अग्निरिंदुमानाज्यस्य वेतु ३ वौ ३ प्रधानयागे॥ अग्निं तं मन्ये यो वसु॰ भरो ३

॥१९॥ पुरोनुवाक्या ॥ ये ऽग्निंसोऽअग्निं ऽभ रो वौषडिति याज्या स्विष्टकृति ॥ अग्ने नतमद्या
श्वं ऽ ॐ हो ॥ इति पुरोनुवाक्या ॥ ये ३ हे ग्निं स्विष्टकृतमयाडग्निरग्नेः प्रियाधामान्य
याडग्नेः पवमानस्य प्रिया ॥ अथवा अयाडग्नेः इंदुमतः प्रियेति वा ॥ अयाडग्नेः
प्रियाधामान्ययाडग्नीनाज्यपानां प्रियाधामानि यक्षदग्ने ऽ हवि ॥ अधाह्यग्ने क्र ऽ
भूया ३ वौ ३ षडेक याज्या ॥ अनुयाजेषु ॥ अग्नेर्वसुवने वसुधेयस्य वेतु ३ वौ ३ षड् इति
प्रथमो ॥ भूर्भुवः अग्नाउ वसुवने वसुधेयस्य वेतु ३ वौ ३ संगिति द्वितीये ॥ देवो ३
अग्निः स्विष्टकृत्सुद्रविणेति प्रकृतिवत् ॥ अंत्यमनुयाज उच्चैः ॥ अन्यत्सर्वमुपांशु ॥
सूक्तवाके ॥ अग्निर्हविरजुष ऽ कृत ॥ अग्निः पवमानो हविरजुषतावी ऽ कृत ॥ अथ
वाग्निरिंदुमान्हविरजुषता ऽ कृत ॥ अग्निर्हवि ऽ कृत ॥ अग्नय आज्यपा आज्यमजु
षंतावीवृधंत महो ज्यायोऽकृत ॥ अग्निर्होत्रेणेत्यादि प्रकृतिवत् ॥ सांख्यायनसूत्रग
तो विशेषो लिख्यते ॥ त्रिषु च प्रयाजेष्वग्निशब्दो विकृतः ॥ अग्निशब्दो विकृत इत्युक्ते
नैवव्यंति तिशब्दो विकृतावितीति तद्भाष्ये ॥ प्रथमः प्रयाजः प्रकृतिवत् ॥ द्वितीये ये ३ हे तन
नूनपादग्निमाज्यस्य वेतु ३ वौषट् ॥ नराशंसोऽअग्निमिति नराशंसयाजिनां ॥ तृ
तीये ॥ ये ३ हे ळो अग्निमाज्यस्य वेतु वौ ३ षट् ॥ चतुर्थे ये ३ हे बर्हिरग्निराज्यस्य वेतु ३

ज्य

षट्॥पंचमःपूर्ववत्॥वार्त्रघ्नःपूर्वआज्यभागः॥अग्निंस्तोमेनबोधयेतिवा॥अग्नये
बुद्धिमतेइतिद्वितीयः॥ज्ञातपथवत्प्रकारद्वयं॥अग्निर्मूर्द्धेतिवा॥रेतस्वतेइति
तृतीयःप्रकारः॥प्रधानयागे॥अग्नेतमद्येतिपुरोनुवाक्या॥एभिर्नोअर्कैरिति
याज्या॥अधाह्यग्नइतिस्विष्टकृतः॥पुरोनुवाक्या॥अभिष्टेअद्येतियाज्या॥प्रथमे
नुयाजे॥देवंबर्हिरग्नेर्वसुवने॥द्वितीयेदेवोनराशंसोग्नावसुवने॰नुवौषट्॥
निगमेषुअग्निनाज्यपानितिविशेषः॥सूत्रकृताविहितोनास्ति॥तेनप्रस्तवदे ति६
वदेवा॥आज्यपानित्येवप्रयोज्यं॥प्रयाजानुयाजादिस्थानाअपिप्रकृतिवद्देवा॥
प्रैषोपिसमिधोयज॥देवान्यजेत्येव॥नाग्नीन्यजति॥उपांशुत्वंवाध्वर्युवज्ञा
द्भवतीतितत्दीयंशांखायनोक्तमप्रदर्शितं॥अन्यत्समानं॥ ॥अथप्रसंगात्सु
नराधेयनिमित्तानिलिख्यंते॥ ॥अग्नावनुगतेयस्यहोमकालद्वयंव्रजेत्॥
उभयोर्विप्रवासेवालौकिकोग्निर्विधीयते॥१॥अनौविनाऽसमारूढंतुर्ध्वत्रा
म्यापरासनात्॥हतोग्निर्लौकिकोज्ञेयःश्रुतोसर्वत्रदर्शनात्॥२॥कुरुक्षेत्रादि
तीर्थानांगमनेदेशविप्लवे॥समारोपंविनैवाग्नीन्मोहद्धेतुर्विपश्चितः॥आरो

॥२०॥ ष्वाग्नीनरण्योः स्वानुद्वस्येत्स हाग्निभिः ॥१॥ दृष्टोग्निर्यदिनश्येत मथ्यमानो
हुताशनः ॥ ग्रामात्सीमांतरं गच्छेत्स सक्तो हव्यवाहनः ॥२॥ अहुतो वत्सरं गच्छे
त्सद्य केनचिदासंगतः ॥ त्रिकेयनोद्वाहयेदग्नीन्पुनराधानमर्हति ॥३॥ अग्निहोत्रेण
रहितः पंथानश्चानुयोजने ॥ आहिताग्निः प्रयायाच्चेदग्निहोत्रं विनश्यति ॥४॥
अर्वाक्स्वयमजुह्वानो हावयेदृत्विगादिना ॥ तस्यस्यात्पुनराधेयं पविच्छे ष्टिर
थापि वा ॥५॥ विहायाग्निं सभार्यश्चेत्सीमामुल्लंघ्य गच्छति ॥ होमकालात्ययेत
स्य पुनराधानमिष्यते ॥६॥ अरण्योः श्चनानाग्निंदाहेष्वग्निंसमाहितः ॥ पालये
दुपशांतेस्मिन्पुनराधानमिष्यते ॥७॥ ज्येष्ठा चेद्बहुभार्यस्य अतिचारेण गच्छति ॥
पुनराधानमत्रैक इच्छंति न तु सूरयः ॥८॥ दाहयित्वाग्निभिर्भार्यां सदृशीं पूर्व
संस्थितां ॥ पात्रैश्चाथाग्निमादध्यात्कृतदारोऽविलंबितः ॥९॥ दाहयित्वाऽग्निहो
त्रेण स्त्रियं वृत्तवतीं पतिः ॥ आहरेद्विधिवद्दारानग्नींश्चैवाविलंबयन् ॥१०॥ जी
वंत्यामपि ज्येष्ठायां द्वितीयेपरिणयनेकृते ॥ उत्सर्गेष्ट्याग्नीनुत्सृज्याऽन्ययास
ह पुनरादध्यादिति स्मृतिचंद्रिकायां ॥ भार्यायां विद्यमानायां द्वितीयामुद्वहेद्यदि ॥

नद्यो वै वाह्निकं कर्म कुर्यादावसथ्येग्निमान् ॥११॥ उपघातः क्रियालोपः उपेक्षा च
प्रमादतः ॥ त्रिविधमिदं प्रोक्तं पुनराधानकारणं ॥ प्रसिद्धकर्मणां लोपः उपघातो यजा
दिना ॥ उपेक्षणं प्रवासादि प्रमादोग्नेरधारणं ॥१२॥ स्पृष्टोग्निर्यदि चांडालैः शूद्रका
दिभिरेव वा ॥ उपघातेषु सर्वेषु पुनस्तेतिसमिंधनं ॥१३॥ यजमानश्च पत्नी च उभौ
प्रवसितो यदि ॥ आहोमान्ते निवर्तंते पुनराधानमर्हति ॥१४॥ यदोभावप्यतिक्रम्य
सीमां प्रत्यागतो पुनः ॥ होमकालमतिक्रम्य तदा नश्यंति वन्हयः ॥१५॥ विनाग्नि
भिर्यदा पत्नी नदीं मंत्र धिगामिनी ॥ अतिक्रामेत्तदाग्नीनां विनाशः स्यादिति श्रुतिः ॥
॥१६॥ पत्न्येन रथवा पत्यो कृता स्नान समीपगे ॥ तदा पत्नी यथाकाममतिक्रामेन्न
दीमपि ॥१७॥ पत्नी सीमामतिक्रांता यजमानो गृहे यदि ॥ अहोमाद्य ३ दिनागछेत्पु
नराधानमर्हति ॥१८॥ एकाकी न यदा पत्नी वन्हिमादाय गच्छति ॥ तत्र नाशो ३ परे
त्वाहुर्भयाद्यानेन दुष्यति ॥१९॥ रजोदोषे समुत्पन्ने सूतके मृतकेपि वा ॥ प्रवसन्न
ग्निमान्विप्रः पुनराधानमर्हति ॥२०॥ बव्हीनामपि चैकस्यामुदक्यायां न तु व्रजेत् ॥
एकादशोच्चतुर्थेन्हि गंतुमिच्छेन्निमित्ततः ॥२१॥ त्रयी मुक्तातु योत्तोभास्त्रवसे सर्व
संधिषु ॥ करोति पुनराधानं प्रायश्चित्तमृणाहृते ॥२२॥ नाग्निकार्यस्य वेलायां प्र

॥२१॥ वसेन्नचपर्वणि॥नविनाचनिमित्तेनक्रीडाद्यर्थंतुनव्रजेत्॥२३॥नदीसंतरणेग्नी
नासीमातिक्रमणेतथा॥सर्वत्राक्रांतसीम्नोर्वास्वामिस्पृष्टास्यरग्नयः॥२४॥प्रस
मरणिहारंवाऽन्यथाग्निविनाशनं॥आत्मारंभणपक्षेतुनाशोरंभणमिष्यते॥२५॥
उदक्याचेद्भवेत्सत्नीप्रसूताप्रवसत्यपि॥अन्वारंभविकल्पत्वात्तुनराधिर्नतन्म
तातु॥२६॥ज्येष्ठान्वारंभेतेवन्हिबहुभार्यस्यतेनराः॥नरुच्यैकाकिनीपत्नीप्र
यायादग्निभिःसह॥२७॥राष्ट्रभंगेचादिसंप्राप्तावुचितंयानमीहृशं॥अन्यथाहि
प्रसवंस्याद्वन्ह्योर्लौकिकाख्वरूपु॥२८॥राष्ट्रभंगेशादिगमनेप्रासेदेवोमनस्वतीं॥
जुहुयाच्चतुरोनेनस्मार्तग्नेोसर्वसंज्ञितं॥२९॥सायंप्रातर्हुनेत्सर्वीमेवस्याद्गम
नेत्वहं॥यस्त्वऽग्न्याधेयमात्मार्थंकृतवान्मृतभार्यकः॥३०॥पत्नीविरहितोव
न्हिन्यथाकामंसनिर्हरेत्॥होमंद्द्यात्ययेदर्शपूर्णमासात्ययेतथा॥३१॥
पुनरेवाग्निमादध्यादितिभार्गववृत्तासनं॥बहुत्ताविहृतोह्यग्निरावसथ्याख्यस्तथं
चन॥यावदेकोपितिष्ठेत्तावदन्योनमथ्यते॥३२॥वैश्वदेवान्तथाहोमात्रोक
त्तेयंनैवमंथनं॥एकेनांतरितोवान्हिरावसथ्यस्तुमथ्यते॥३३॥आवस[illegible]

॥२१॥

थ्यात्तु कर्मार्थे योग्निरुद्ध्रियते क्वचित् ॥ पूर्वेण योजयित्वा तं तस्मिन्होमो विधीय
ते ॥ ३४ ॥ चतुर्विंशतिमते ॥ प्रातर्होमं तु निर्वर्त्य समुद्धृत्य हुताशनात् ॥ शेषं महान
से स्थाप्य तत्र पाकं समाचरेत् ॥ ३५ ॥ तमग्निं पुनराहृत्य शालाग्नावेव निक्षिपेत् ॥
ततोऽस्मिन्वैश्वदेवादि कर्म कुर्यादतंद्रितः ॥ ३६ ॥ बह्वृचगृह्यकारिकायां ॥ नि
त्यपाकाय शालाग्नेरेकदेशास्य कार्यते ॥ पाकार्थमुल्मुकं हृत्वा तत्र पक्का महा
नसे ॥ ३७ ॥ वैश्वदेवोऽन्यगारे स्यात्पाकार्थोग्निश्च लौकिकः ॥ भूरिपाको भ
वेद्यत्र श्राद्धादावुत्सवेषु च ॥ ३८ ॥ तत्रापि वैश्वदेवार्थं लौकिको नैव कार्यते ॥
होमे नानारिते केचिदाहुः सर्वत्र लौकिकं ॥ ३९ ॥ न तत्समंजसं तेषामुपपद्य होम
दर्शनात् ॥ समासंचोल्मुकं स्यादाहुरग्न्यगारे महानसात् ॥ ४० ॥ पाकान्ते वैश्वदे
वास्त्राक्नैतदप्युपपद्यते ॥ आह नेतुल्मुके पाकः शाग्निश्चेद्धूयते परो ॥ ४१ ॥
वचनादाहृतिः सा तु लौकिकाग्नेर्यो ॥ स्तोवन्मात्रापवर्गतः ॥ ४२ ॥ पचनाग्नेः पृथ
ह्वग्नेः सूतके मृतकेपि वा ॥ अपक्कात्तु वसेद्ग्रावि पुनराधानमर्हति ॥ ४३ ॥ अरण्यो
र्दग्धयोर्वापि नष्टयोः क्षणयोस्तथा ॥ आहस्यान्ये समारोप्य पुनस्तत्रैव निर्मथेत् ॥ ४४ ॥

अरण्योरस्त्वमप्यंगं यावत्तिष्ठति पूर्वयोः ॥ न तावत्पुनराधानं अन्यारण्योर्विधीयते ॥ ४५॥
पूर्वयोर्विनिः पूर्वोक्तपुनराधानकर्मणि ॥ अथ तत्रैव तिवसे ग्रामं गत्वा प्रमादतः ॥ लौ
किकाग्निः स विच्छेषरूसेषाग्नेर्गमीश्रुतिः ॥ ४६॥ भार्यायां प्रोषितायां च दुर्देस्य के
स्तमेति वा ॥ तत्रस्यास्पुनराधेयमन्ये त्वाहुरिहान्यथा ॥ ४७॥ पत्न्याः प्रवासविषये
पुनराधिरुदाहृतः ॥ वाक्येर्मनिषिभिः प्रोक्तैरेकभार्यस्य रोचते ॥ ४८॥ बहुभा
र्यस्य ज्येष्ठयान्वित्प्रवसेत्पुनराहितिः ॥ ज्येष्ठा चेदग्निसंयुक्ता गच्छत्यन्या यथारु
चि ॥ ४९॥ यजमानेन सहिता यद्यातान एव केवलः ॥ एकस्यामपि तिष्ठत्यामग्नि
होत्रसमन्वितः ॥ ५०॥ पतिस्तिष्ठति चेदग्निनाशो न स्यात्परे जगुः ॥ युदासीनामृति
केन्यूनाश्चौ तत्रैव वक्ष्यति ॥ ५१॥ अग्रहस्य प्रयाणं यत्प्रवासस्तूच्यते बुधैः ॥ येतु
नारायणेनोक्तं ग्रामान्त्वाग्निसमन्वितात् ॥ ५२॥ गत्वा ग्रामान्तरे वासः प्रवासो
यमितीदृशः ॥ ग्रामान्तरे न गर्ये वा पत्न्यां वान्यत्र वा क्वचित् ॥ ५३॥ सीमामतीत्य
चेद्रात्रौ वासः प्रवसनं स्मृतं ॥ प्रवसेद्धनसंपत्त्यै न तीर्थाय कदाचन ॥ ५४॥ ॥
इति कूर्मपुराणोक्तं तथा बौधायनेन च ॥ ५५॥ सहाग्निवा सपत्नीको गच्छतीर्था

निमानव ॥ पुराणवचनात्सांग्नेः प्रवासोस्तीति केचन ॥ ५७ ॥ न कुर्युरग्न्युपस्था
नं प्रवत्स्यतः स्वोपि प्रोषितः ॥ त्यागान्न प्रोषिताः कुर्युरभ्यस्येव सधर्मकं ॥ ५८ ॥
आगमोपस्थितिं वापि स्त्रीणां नेच्छन्ति सूरयः ॥ सगृहस्ये प्रयाणं यत्तत्सस्त्यग्नि
समन्वितं ॥ ५९ ॥ क्विचिश्चेत्तत्र वस्त्यर्थं गनेसास सहगच्छति ॥ अनस्यारोपयेद
ग्नीन्नस्तत्सात्राण्यपितच्च ॥ ६० ॥ स्वांगेनवानयेदग्निकात्यायनसतादपि ॥
नयद्वा ब्राह्मणस्त्वन्योजवेन सहगच्छति ॥ ६१ ॥ प्रत्यक्षेण नयन्नेह्यन्यस्येत्त्रि
र्हरणेः नन्नः ॥ ग्निमनुप्रसेच्चेद्विनश्यति ॥ यदि वानुप्रसन्नीत्वा निधायोभ्यस्य
तं पुनः ॥ ६२ ॥ हरेदनुप्रसन्नेव नस्येत्त्रिर्हरणेः नत्तेः ॥ शाकटेनापि दूरं वाह
रेद्वां यथारुचि ॥ ६३ ॥ स्वांगेनेवाथवा ग्राम्या परासात्प्रात्र्य प्रसनूः ॥ कर्मार्थं
हरणे ग्नीनां नानुप्रासादि वोद्यते ॥ ६४ ॥ कात्यायनमतात्केचित्प्रसंतो प्यनिद्व
रतः ॥ प्रत्यक्षेण नयंस्त्वग्नीन् शाकटेन विनापि तु ॥ ६५ ॥ आधोना वसरे जा
तेयद्याधानुरूपद्रवः ॥ अवछिर्नामसा प्रोक्तात्तत्रस्यात्पुनराहितिः ॥ ६६ ॥
उद्धातेग्नो विहारात्प्राक्मध्यमानोप्यजन्मनि ॥ लोकाग्न्यादावनिक्षिसे भ्यु

दयेस्तमयेपि वा ॥६७॥ विनष्टहेतुना नेनजातवेदा विनश्यति ॥ विहारोत्तरकालं
वा नष्टो पूर्वापरो न सो ॥६८॥ त्रोपंपूर्वेद्दितं सर्वं नत्राप्यग्निर्विनश्यति ॥ कालात्य
त्वेत्त निर्मथ्य लौकाग्न्यादौ क्षिपेद्युति ॥६९॥ उदयास्तमयात्पूर्वं कर्मज्ञानाभ्या
भिधुत्ति ॥ लौकाग्न्यादावलब्धे पि पुराकौस्तमयोदयात् ॥७०॥ मंथनारंमात्रेण
नम्रोवङ्के निर्वारितः ॥ उभयोर्नोज्ञा विज्ञानात् धर्मकोस्तिमेति चेत्तूणक कोग्निना
त्रामाचष्टे पश्चाज्ज्ञातेपि नेष्यति ॥ एकयोनित्वपक्षेतु सर्वाग्न्यनुगमोयदि ॥७२॥
उदयास्तमयेतत्तु नाशमेकेनतूभयोः ॥ अथचेदुभयोर्ह्यातेभ्युदयास्तमयेतु
रा ॥७३॥ परोग्निरेकोजातश्चेत्तोवनापिननश्यति ॥ नदनुसत्ति मात्रेण स्वाद
न्याधिर्नपूर्वयोः ॥७४॥ मंत्रंविना समारूढो रण्योरात्मनिवायदि ॥ नत्रत्तनश्रां
तोस्यादत्रामारूढस्तांतिवत् ॥७५॥ आरूढोपियथाशास्त्रं भवरूढोनशास्त्रतः ॥
तृतीये होमकालेथ संप्राप्तेपुनराहिति ॥७६॥ यदातु लौकिकाग्न्यादिर्निधाय
हवनंतदा ॥ हुतेपि लौकिकाग्न्यादो मथ्यमानोप्यनंतरं ॥७७॥ द्वितीयाद्वा तृतीया
द्वा होमकालात्सुरायदि ॥ अग्निर्नजायतेतत्र पुनराधेयमाचरेत् ॥७८॥ हुतेषु

पक्षहोमेषु पक्षत्रयमनंतरं ॥ कर्तव्यं पुनराधेयं मथ्यमानो हुताशनः ॥ १९ ॥ दृश्य
मानोनुगच्छेच्चेन्न च तस्य विनाशनं ॥ ज्ञातशोनुगमे चान्यं पुनर्निर्मथ्य जप्यते ॥ २० ॥
नष्टे मथितमात्रे वा समारोप्य यजुर्जपेत् ॥ पुनर्निर्मथ्य जप्तव्यं यजुस्तूयावरोहणं ॥ २१ ॥
नष्टे नहेतुना वन्हिरूपस्थानेतो यदा भवेत् ॥ कर्तव्यं पुनराधेयं यस्य पोर्ध्वं निरूपितं ॥ २२ ॥
नदेव पुनराधेयमग्नावनुगते सति ॥ असमाधाय चेत्स्वामी सीमामुल्लंघ्य गच्छति ॥
॥ २३ ॥ श्वशूकररासभकाकश्रृगालैः कुक्कुटमर्कटश्वद्भिः ॥ अंतेजपानकिभिः
कुणपैर्वसूतिकयापि रजस्वलयापि वा ॥ २४ ॥ रेतोमूत्रपुरीषैर्वा पूयाश्रुश्लेष्मशो
णितैः ॥ दृष्टास्थिमांसमज्जाभिरन्यैर्वापि जुगुप्सितैः ॥ २५ ॥ आरोपितारणीस्प
र्शिते गौ स्पर्शने पि वा ॥ आत्मारूढेषु मज्जेतो ह्युद्वदेह्यापतितादिभिः ॥ २६ ॥
अथ वायोपितं गच्छेदन्तो कामतो हितः ॥ वदंत्येषु निमित्तेषु केचिदग्निविना
शनं ॥ २७ ॥ तत्रारणिगते वन्हौ नष्टे स्यात्पुनराहितिः ॥ इतरेषु निमित्तेषु मन्या
धेयं प्रचक्षते ॥ २८ ॥ यद्वा सर्वेपि घातेषु पुनस्त्रेतिसमिंधनं ॥ द्रव्यस्पर्शेन्युपघा
तेषु द्रव्यशुद्धिः समिंधने ॥ २९ ॥ समिंधनं पुनस्त्वादित्यारुद्रा इति मंत्रेण समिंध

॥२४॥

स्याद्यग्नेः पुनरिंधनप्रक्षेपेण प्रदीप्तकरणं ॥ आरोपितारणीश्चोभे एकावाय
द्विनश्यति ॥ तत्राग्न्याधेयमिष्टं तु पुनराधेयमेव वा ॥ ९२ ॥ रत्यनारोपितारण्योः
२दो क्षयेग्राहे भवेत्पुनः ॥ तदलाभे यदि त्यायादच स्यात्पुनराहितः ॥ ९३ ॥ भस्त्रोदक्यांत्य
काकेश्वपतितामेध्यरासभेः ॥ अनारूढारणिस्पर्शे तु विहायान्याग्नेयोर्ग्रहः ॥ ९४ ॥
भवतन्नः समेत्य सुमज्जयेदूषितारणी ॥ एकारण्येव दुष्टा चेत्तामेवाप्सु निमज्ज
येत् ॥ ९५ ॥ तत्राश्योरणिश्चाभ्यां स्त्रा गुह्याते पुनराहितिः ॥ काष्ठमुध्या विन्हौ ध्येवाय
जेद्यथेष्टं तु संततं ॥ नष्टायामरण्यां यावदग्निस्तिष्ठति वेश्मनि ॥ तावद्धोमादिकं कृत्वा
तन्नाशे पुनराहरेत् ॥ ९६ ॥ प्रागादिस्योदयाद्धोमं संकल्प्य न जुहोति चेत् ॥ अग्नाधिः
पुनराधिर्विनोभयं स्वाम्यसंन्निधौ ॥ ९७ ॥ नान्यापहारादग्नीनां यद्यारूढारणेर्य
दा ॥ कुर्याच्च पुनराधेयमिति बोधायनोब्रवीत् ॥ ९८ ॥ अत्रैतेषु निमित्तेषु नष्टा
नां पुनराहितिः ॥ स्थितानुत्सृज्य चान्येषु पुनराधेयमिष्यति ॥ ९९ ॥ अग्निहो
त्रे च निस्येष्टिः पित्र्ययज्ञ इति त्रयं ॥ कर्तव्यं प्रोषिते पत्यो नान्यस्वामिक्रियान्वि
तं ॥ १०० ॥ नैमित्तिकास्तु जातेष्टिगृहदाहेष्टिपूर्विकाः ॥ स्वाम्यागमनपर्यंतमुल्ल

॥२४॥

ष्व्याहृत्य शेषतः ॥१०१॥ अग्न्याधेयादिकं प्राप्तमुभयानुगमादिना ॥ स्वाम्यागमन
पर्यंतमुत्सृष्टव्यमसंशयं ॥१०२॥ मथित्वा पावकं सर्वं प्रायश्चित्तं विधाय च ॥ मित्रा
येत्यादिभिर्हुत्वाह्वादशानुगमाहुतिः ॥१०३॥ अग्निहोत्रं यथाकालं नित्येष्टिं च स
माचरेत् ॥ अस्वाम्यागमनादिष्टेदागस्याथाद्धीतेसः ॥१०४॥ एवं केशावसिद्धां
तास्त्रोषितस्याग्निषु क्रिया ॥ अवशं भाविनी मुक्ता ध्रुमावस्येमतांतरं ॥१०५॥
काम्याः क्रिया न कर्त्तव्याः स्वामिनि प्रोषिते सति ॥ नित्यनैमित्तिकीः कुर्यात्स्वाव
सत्यपि भर्त्तरि ॥१०६॥ तच्चापि नैव कर्त्तव्याः क्रियाः सोन्तरवेदिकाः ॥ आधानं
पुनराधानं नस्तः प्रत्यो प्रवासिनि ॥१०७॥ उभयानुगमादौ नु प्राप्तेग्न्याधेयतः
पुरा ॥ न किंचिदग्निहोत्रादि कर्त्तव्यमिति दर्शने ॥१०८॥ रजोदोषोसमुत्पन्ने सू
तके मृतके पि वा ॥ नित्यं नैमित्तिकं कुर्यात्कार्यं कर्म न किंचन ॥१०९॥ आधानं पुन
राधानं पशुः सौत्रामणी तथा ॥ चातुर्मास्यानि सोमश्च तथैवाग्रयणक्रिया ॥११०॥
अकाम्यत्वे पि नैतेषां सूतकादावनुष्ठितिः ॥ प्रक्रांतेष्वपि चैतेषु सूतकादिसमु
द्भवे ॥१११॥ सूतकान्येव चैतानि वारितान्यपि शेषतः ॥ जातोपि वा बिना भस्मस्प

र्जितजपं विना॥९२॥ प्रायश्चित्तं विना काष्ठमंथने चोदितं विना॥ लौकिकः स्या
दतो लुप्तादारभ्यावर्तयेत्पुनः॥९३॥ यदि नावर्तयेद्वन्हौ ताहृश्येच जुहोति च॥
हूयमाने पि लुप्येत होमकालष्टकास्सरं॥९४॥ भस्मस्पर्शे विनाप्येके लौकिक
त्वेनुमन्वते॥ होमाष्टकाधिके लुप्ते ध्रुतोप्यग्निर्विनश्यति॥९५॥ ध्रुतोप्यहो
मलोपोपि यद्यप्यायो विनश्यति॥ आधानं पुनराधाने विकल्पेनात्र चोदितं॥९६॥
लुप्त होमद्वये प्राहुर्लोगाक्षिरनलाहितं॥ ज्वलत्स्वग्नीषु कर्तव्यातं तु भस्मेव
केवलं॥९७॥ आपद्यग्निषु दीप्यत्सु मासार्द्धं चेन्न हूयते॥ सर्वहोमानतिक्रां
तान्पक्षांते पक्षहोमवत्॥९८ समस्य जुहुयात्सर्वादिष्टिस्तंतुमती भवेत्॥
न तत्र पुनराधेयमिति कौषीतकी श्रुतेः॥९९॥ वत्सरं वत्सरार्द्धं वा होमलोपे म
तांतरं॥ आपत्कालेन नश्यंति दीप्यंते चेद्धुताशनाः॥१००॥ पंच कार्याः पुरोडा
शा होमे लुप्तेऽर्द्धवत्सरं॥ पथिकृत्प्रथमो ज्ञेयः पावकः शुचिरेव च॥१०१॥ व्रत
पतिस्तंतुमांश्चाग्नेर्देवतागुणाः क्रमात्॥ समस्त कुर्यात्पुरोडाशाञ्होमलुप्ते तु वत्सरं॥११२॥
१३ क पवमानः पावकश्च शुचिः पथिकृदित्यपि॥ वैश्वानरो व्रतपतिस्तंतुमानिति सप्तमं॥११३॥

विच्छेषितोग्निरेवस्याद्देवताचयथाक्रमं॥ एकारंभपरार्द्धांतविच्छेदेष्वविच्छे
षतः॥११४॥ मनस्वंतीव्रतयुतांनाऽधानमनूह्येसति॥ इयमापत्सुधारोसु
भिन्निन्नासूययोरुच्यते॥११५॥ द्वादशाहमहतिघ्वेदेकुर्यादन्येमनस्वतीं॥ अर
ण्योःक्षयनाशाग्निदेहेष्वाग्निंसमाहितः॥११६॥ पात्रयेदुपशांतेस्मिंस्पुन
राधानमिष्यते॥ एकारण्यांविनष्टायांअस्तिचेदितरारणिः॥११७॥ तां
घृत्वामंथनंप्रोक्तंभाष्येबोधायनीयके॥ अरणीमंथनात्कालेजीर्णेभिर्मथ
नेनवा॥११८॥ स्यातांचेदरणीनूतनेग्राह्येशास्त्रोक्तलक्षणे॥ श्वोभूतेनुष्ठि
तेदर्शेतस्मिंजीर्णारणिद्वयं॥११९॥ शाकलीरत्यपश्चान्येवन्हौनिक्षिप्यदीप
येत्तु॥ ततोदक्षिणहस्तेननूतनामुत्तरारणिं॥१२०॥ गृहीत्वासव्यहस्तेनगृ
ह्णीयादधरारणिं॥ तेउभेअरणीतत्रदीप्तेग्नेधारयन्जपेत्॥१२१॥ उद्बु
ध्यस्वाग्निप्रत्येनदृयंतेयोनिरित्यपि॥ उद्बुध्यस्वाग्नेप्रविशस्वयोनिमन्यं
देवयज्यायैवोढवेजातवेदः॥१२२॥ आरण्योररणीअनुसंक्रमस्वजीर्णा

तनुमजीर्णयानिर्णुदस्त्वेत्तिप्रथमोमंत्रः॥मंथस्याच्चतासम्यक्कमथित्वाग्निवि
हृत्यच॥१२३॥विलाप्योत्स्तूयद्दर्भाभ्यांस्रुवादायचतुर्थतः॥जुहोत्याहवनीये
ग्नौमनस्वेत्साध्वतोतया॥१२४॥इष्टिंतुंतुमतींकुर्याद्घरावंदक्षिणांददेत्॥
घृतंप्रादेशमात्रंतुशरावंनिगमोदितं॥१२५॥इत्येनारोपितारण्योःक्षय
ग्नाहेनवेपुनः॥तदस्त्राभेयदोह्वायेत्तदास्यात्पुनराहितिः॥१२६॥कामोनि
मित्तयोगेवापुनराधेयमिष्यते॥निमित्तेषुयथायोगमाधानमतिचाभवे
त्॥१२७॥नत्वेतेषुनिमित्तेषुभ्रंशगत्याहिकृयाविधिः॥नचैवपुनराधेय
मन्यथाधानमिष्यते॥१२९॥अन्यत्राप्यपरेप्राहुःपुनराधिर्विकल्पतः॥
यदित्वंजीवनायालंक्षुद्रवास्येकवत्सरं॥तन्नाशेपुत्रमत्यीयांज्ञातीनास
वरोधने॥१३०॥अंगनाशेंगनानाशेपुनराधानमिष्यते॥ज्योतिःसर्व
स्वाहानिःस्यात्स्पष्टंमाध्यंदिनिश्रुतेः॥१३१॥पुन्यान्यन्यानिकुर्वीतश्रद्द
धानोविमत्सरः॥नत्वल्पदक्षिणैर्यज्ञैर्यजतेहकथंचन॥१३२॥इंद्रियाणि

यशः स्वर्गमायुः कीर्तिं प्रजां पशून् ॥ हृत्वान्येन धनेनैव विप्रो नान्यधनं व्रजेत् ॥१३॥
इति पुनराधानपुनराधेययोर्निमित्तानि ॥ ॥अधिकारे सत्याग्न्याधानाकरणे दू
तदारोगगृहे ज्येष्ठायोनादध्याहुताशनं ॥ चांद्रायणं चरेद् द्विषं प्रतिमासमहोपि वा ॥ व
र्षातिक्रमे चांद्रायणं ॥ मासातिक्रमे त्र्यहरूपवासः ॥ श्रौतस्मार्ताग्निभावे प्रायश्चि
त्तं ॥ गृहीतस्याग्नेर्नास्तिक्यादिना परित्यागो व्याघ्रपादः ॥ २ मासद्वयं तु यो वह्निं
त्यजेद् वै समाचरेत् ॥ नास्तिक्यात्कृच्छ्रमेकं तु होमद्रव्यं ददाति चेत् ॥ तथा ॥
योग्निं त्यजति नास्तिक्यात्प्राजापत्यं चरेद् द्विजः ॥ अन्यत्र पुनराधानमुपदि
ष्टमनीषिभिः ॥ मासचतुष्टयमभिव्याप्याप्य परित्यागे ३ त्रिकृच्छ्रं ॥ तथा च स
एव ॥ चतुष्टये त्वसंपूर्णे मासानां तु हुताशनं ॥ त्यक्त्वा त्रिकृच्छ्रं कुर्वीत ततः
पापात्प्रमुच्यते ॥ षण्मासपर्यंते परा[illegible]कः ॥ अत ऊर्ध्वमब्दपर्यंतं पयो
व्रतं ॥ यथाहोशनाः ॥ षण्मासांस्त्यजते योग्निं पराकं तु समाचरेत् ॥ ऊर्ध्वं प
योव्रतं कुर्यान्मासमेकं समाहितः ॥ वर्षपर्यंतमेवाह मनुयः क्रासिनव्रताः ॥
संवत्सरादूर्ध्वं तु स्कंदपुराणे ॥ ऊर्ध्वं संवत्सरादग्निं यस्त्यजेत्स पयोव्रतं ॥ द्वि

॥२७॥ मासिकं ततः कुर्यात्त्रैमासिकमथापि वा ॥ कालात्त्ययस्त्ववहुत्तापेक्षया विकल्पः ॥
प्रमादात्मासमग्निपरित्यागेपि स्कंदपुराणे ॥ हुताशनं द्वियो विप्रः प्रमदात्त्यजति
प्रभो ॥ प्राणायामशतं कुर्यादुपवासमथापि वा ॥ प्राणायामशतं त्रिरात्रपरित्या
गे ॥ कूर्मपुराणे ॥ षष्ठिरात्रं त्यजेदग्निं प्रमादाच्छृणु मे प्रभो ॥ उपवासं ततः कु
र्यात्प्राजापत्यमथापि वा ॥ तथैतस्य नेन तत्र प्रवृत्तं त्रिरात्रं पराम्रश्यते ॥ मास
द्वयमग्निपरित्यागे त्रिरात्रं ॥ अत ऊर्ध्वं संवत्सरपर्यंतं मासं मासं प्राजापत्यं ॥
अत ऊर्ध्वं कालबहुत्वे प्रायश्चित्तबहुत्वं ॥ तथा च भारद्वाजगृह्ये ॥ प्राणायाम
शतमात्रिरात्रमुपवासः स्यादाविंशतिरात्राद तऊर्ध्वं माषष्ठिरात्रात्तिस्रो
रात्रीरुपवसेत् ॥ अत ऊर्ध्वं मासं वत्सरात्प्राजापत्यं चरेत् ॥ अत ऊर्ध्वं काल
बहुत्वे हस्त्वपवासश्च त्रिरात्रादिसपिपाठः ॥ आलस्येन परित्यागे स्मृत्यंतरे ॥
आलस्येन यदा वह्निं द्वादशाहं त्यजेत्प्रभो ॥ त्रिरात्रमुपवासेच्च चरेत्पाप
विमुक्तये ॥ यदात्वालस्यादिना त्यागे नैव विशेष उक्तं ॥ भारद्वाजगृह्ये द्वादशा

हातिक्रमे ऽहमुपवसेत्॥ मासातिक्रमे द्वादशाहमुपवासः॥ संवत्सरातिक्रमे मा
सोपवासः॥ पयोभक्षणमेव॥ कुष्मांडिभिर्होमः क्रमेणोभयं चेति॥ उपवासासमर्थ
स्य मासं पयोभक्षणं॥ संवत्सरानंतरं अधिककालातिक्रमे उभयं॥ एतच्च गृह्या
ग्निविषयं॥ हारितः॥ संवत्सरमुत्सन्ने ऽग्निहोत्रे चांद्रायणं कृत्वा पुनराद्ध्यात्॥
द्विवर्षोत्सन्ने चांद्रायणं सोमायनं च कुर्यात्॥ त्रिवर्षोत्सन्ने संवत्सरं कृच्छ्रमभ्यस्य
पुनराद्ध्यादिति शंखः॥ अग्न्युत्सादी संवत्सरं प्राजापत्यं चरेत् चांद्रायणं च दद्यादिति॥
एतदकामतः श्रौताग्न्युत्सादे॥ कामतस्तु मनुः॥ अग्निहोत्रमपविध्य ब्राह्म
णः कामकारतः॥ चांद्रायणं चरेन्मासं वीरहत्यासमं हि तत्॥ इति॥ मासमग्निहो
त्रमपविध्य दिनत्रयं॥ केचनालस्यादिना मासपरित्यागे प्रथममासे लघु
त्रयं॥ ततो मासे संख्यया लघु संख्येति॥ एवमादयो गुरुलघुकल्प्याः शक्त्यपे
क्षया व्यवस्थापनीयाः॥ एवं प्रायश्चित्तानंतरं प्राप्तस्य काले पुनराधानं कृत्वा नित्य
कर्म कुर्यात्॥ प्रायश्चित्तं च होमद्रव्यं दत्वा॥ तथा भारद्वाजगृह्ये॥ यावत्कालम

॥२८॥ होमीस्यात्तावद्दूव्यमशेषतः॥ तद्दानं चैव विप्रेभ्यो यथा होमस्तथैव तदिति॥
संध्याभिष्टिं चरुं होमं यावज्जीवं समाचरेत्॥ न त्यजेत्सूतके वापि त्यजनाद्वै चैव २
दधो द्विजः॥ कुर्यात्संच महायज्ञान्नित्यस्त्रः सूतकं विना॥ नैत्यं नैमित्तिकं चा
न्यत्सर्वं कर्मापि न हापयेत्॥ स्वकर्महानौ पतनमब्दे नैवत्तनापदि॥ स्वकर्म
हानौ नास्तिक्यान्मासेन पतनं स्मृतं॥ द्वादशाब्दव्रते नैव शुद्धिस्तस्य तु नान्य
था॥ तं निरीक्षार्कमीक्षेत स्पृष्ट्वा स्नायात्सचैलकं॥ न तेन संभाषणं हास्य कु
र्वन्नब्दे न तत्समः॥ तदन्नभुक्तो सिद्धस्तु सहशय्यासनेषु च॥ ॥३॥ ॥२ त्ट
तीयकंडिका॥ ॥अथ प्रसृतमभिधीयते॥ गार्हपत्ये नुगते भस्मनारणी
संस्पृश्य मंथनं कर्तव्यमिति स्मृतं॥ तत्र मंथने क्रियमाणे समारूढो नुगतो वा
गार्हपत्यो मथ्यमानो यदि उद्धरणकालात्प्राग्जायते तदा तत्र स्थितोयमग्निं
लौकिकसन्निहितं पर्यवेत्तमाहृत्य गार्हपत्यस्थाने स्थापयित्वा तत एवाहवनी
यदक्षिणाग्निं विहृत्य तस्मिन्विहारे ग्निहोत्रं हुत्वा होमांते गार्हपत्यं मथित्वा

स्वस्थाने स्थापयेत्॥ जन्मकालसंभवनायां तु मथित्वैवाग्निहोत्रं जुहुयात्॥
अत्रापि लौकिकाग्निषु गार्हपत्यस्योपशमे आहवनीयजागरणे चेत्यादि धा
यश्चित्तं॥ शाम्याः अथ पर्वयोश्चांतो पुनर्विहरणं॥ सर्वेषां शांतो पुनर्लौकिकाग्नेः
स्थापनादि॥ होमारंभानंतरमग्निहोत्रे आसन्नेषु चेत्यादि॥ पक्षहोमं कृत्वा
समारूढस्य होमकाले मथनक्रियजनेनाशक्तां कार्यां मथ्यमानश्चेन्न जायेत तर्ये
मदूरादित्येष एव विधिर्भवति॥ तथाच मंडनः॥ अरण्यारोपितोप्यग्निर्मथ्य
मानोनचोद्भवेत्॥ तत्रापि गतिरेवैषा कर्तुर्युक्तामनीषिभिरिति॥ तथा॥
अरण्यारोपितस्याग्नेर्मथनाशक्तो पक्षांतरमाह स एव अरण्यारोपि
तस्याग्नेः पक्षांतरमपीच्छति॥ बोधायनेनाशक्यं चेन्मथनं वापि धारणं॥
लौकिकं वह्निमादीप्य विहृत्याग्न्योस्तु मथ्यतः॥ आरोपितारणी छिन्ना
जुहुयादग्निहोत्रकं॥ मंथनं धारणं चाग्नेर्यावत्कालं न संभवेत्॥ तावत्को
लं जुहोत्येवं सं[illegible]योनि पवसथ्यतः॥ अथवा मथ्यमानस्य गार्हपत्यस्याजन
ने लौकिकाग्नेरभावे त्रयाणामग्निनां स्थाने कें ब्राह्मणं स्थापयित्वा परिस्त

॥२९॥ रणपर्युक्षणाद्युपस्थानांतं सांगमग्निहोत्रं ब्राह्मणानां दक्षिणहस्तेषु जुहोति॥
द्रयांस्तु विशेषः॥ होमात्पूर्वं यत्समिधादानं तदत्र न भवति तस्येंधनार्थत्वात्॥
तस्य चात्रासंभवात्॥ समिदसीत्येतत्समिदाधानमंत्रोपि भवत्येवाऽदृष्टार्थत्वा
त्॥ तत्र समिदसि समिद्धोमे ब्राह्मणहस्तदीदिहि समेद्धाने ब्राह्मणहस्तदीप्या
समिति मंत्रेषु ऊहः॥ एकस्मिन्नेव विप्रहस्ते एकस्थानस्थे सर्वे होमा होतव्याः॥
द्रव्यसंस्कारश्च लौकिकाग्निना कार्य इति याज्ञिकाः॥ ब्राह्मणाश्च प्रत्यङ्मुखा वै
इति धूर्तस्वामिनः॥ अग्निसाध्यानां प्रतपनाधिश्रयणादीनामथालोपो ब्राह्मण
हस्तादिविधिबलात्॥ अस्मिन्पक्षे सायं वा सार्धमागतस्य ब्राह्मणस्य यावज्जी
वं निराकरणं न कर्तव्यं॥ संवत्सरपर्यंतमिति पितृभूतिः॥ ब्राह्मणानामसंभवे दक्षि
णेष्वजकर्णेष्वग्निहोत्रं होतव्यं॥ अत्र सर्वेष्वग्निस्थानेष्वेके कमजं स्थापयित्वा तेषां
दक्षिणकर्णेषु परिस्तरणाद्युपस्थानांतमग्निहोत्रं होतव्यं॥ तत्र समिदसि समिद्धोमे २९
हि ऽजकर्णदीदिहि समेद्धाने कर्णदीप्यास्मि सिद्धत्तरसामिधाधानमंत्रे विशेषः॥ अस्मि
न्पक्षे यजमानो यावज्जीवं संवत्सरं वा अजमांसं नाश्नीयात्॥ अजस्य रागप्राप्तस्य मांसभो

जमस्य प्रतिषेधेन कृत्स्नपर्यस्येडादिभक्षस्य ॥ अजः प्रस्यन्नु स्रोव स्थाप्य इति धूर्त्तस्वा
मिनः ॥ यस्य कर्णे हुतं तस्यैव व्यक्तिविशेषस्य मांसं नाश्नीयादिति वासुदेवः ॥ अजाः संभ
वे कुशास्तंबेषु वारेवर्त्त्ये एकैकं कुशास्तंबं निधाय तत्स्थानसमग्निहोत्रं जुहुयात् ॥ समिदसि
समिद्धोमि कुशास्तंबेषु दीदिहि समिद्धाते कुशास्तंबदीघासीमाति मंत्रविशेषः ॥ अस्मिन्पक्षे
अतः प्रभृत्येवैधं स्वार्थं कुशेषु प्रवेशनं न कर्त्तव्यं ॥ कृत्स्नपर्यस्य तु न निषेध इति धूर्तस्वामिनः ॥
पतेन श्राद्धारख्य प्रवेशनमर्थान्निषिद्धं भवतीति याज्ञिकाः ॥ कुशास्तंबाभावे अप्स्वग्निहोत्रं
जुहुयात् ॥ अत्र पूर्वं गार्हपत्यस्थाने अपःपात्रस्था निधाय ततः आहवनीयदक्षिणाग्निस्थाने
पात्रांतरेण विहृत्य परिस्तरणादि सांगमग्निहोत्रं जुहुयात् ॥ अत्र समिदसि समिद्धोमि आपो
दीदिहि समिद्धाते आपो दीघासीमाति विशेषः ॥ पूर्वपूर्वालाभे उत्तरोत्तरं होमाधिकरणमिति वा
सुदेवः ॥ अस्मिन्पक्षे यजमानेन यावज्जीवं अपां निंदा न कर्त्तव्या ॥ याप्सु हुतं तासां निंदा न का
र्येति वासुदेवः ॥ सर्वेषु पक्षेषु होमांते गार्हपत्यस्य मंथनं कार्यं ॥ तेषां चापस्तंबः ॥ यदि काले
सन्निकर्षे ग्निर्मथ्यमानो न जायेत तत्रान्यं यं पश्येत् तमाहृत्य जुहुयात् अथ त्वरमाणः संनिर्म
थेद्यद्यन्यं नाविंदेद् आजस्य दक्षिणे कर्णे होतव्यमजस्य तु भागोततो नाश्नीयाद्यद्यजां नो विंदेत

ब्राह्मणस्य दक्षिणहस्ते होतव्यं ब्राह्मणं तु वसस्यैनावरूंधीलयद्ब्राह्मणं न विंदेद्दर्भस्तंबे हो
॥३०॥ तव्यं दर्भैना ध्यासीत यदि दर्भान्न विंदेदप्सु होतव्यमापस्तु न परिचक्षीत मा भोजनीया इमा
अभोजनीया इत्यपि भोजनीया अद्भिस्तु पादेन प्रक्षालयीत सांवत्सरिकाण्येतान्निव्र
तानि त्यास्मरथ्यो यावज्जीविभसाले खन इति ॥ अनुद्धृताभिः पादप्रक्षालनं न कार्यं ॥
उद्धृताभिर्न निषेध इति तद्भाष्ये ॥ अपामग्न्येर्होमपक्षे तत्रापि सत्त्वापयेद्दर्भं ॥ होमश्चंक
र्णे कर्तव्यो व्रतमप्यत्र वक्ष्यते ॥ अजस्य मांसं नाश्नीयादिति धर्म जमनाहुतौ ॥ पाणिहोमे
नावरूंध्यात् ॥ ब्राह्मणवासकांक्षिणं ॥ दर्भासनेषु नासीत दर्भहोमेषु वक्ष्यते आपो न नि
धाताभिश्च पादेन प्रक्षालयीत बेनिनैत्तिरिकारिकायां ॥ आश्वलायनसूत्रे ॥ अग्निहोत्रा
धकालेग्नावजायमाने प्यन्यमानीय जुहुयुः ॥ पूर्वोक्ता भवन्त्युत्तरोत्तरं ब्राह्मणपाण्यजकर्ण
दर्भस्तंबाप्सु काष्ठेषु पृथिव्यां हुत्वा वरयामं थनेपाणौ चेद्रासनवरोधः कर्णे च मांसवर्ज
नं स्तंबे चेन्नाधिशयीताप्सु चेद्वर्षे एतान् सांवत्सरिकं यावज्जीविकं चेति ॥ ॥ आहिता ॥३०॥
ग्निहोत्रे सूर्योदये जाते होमार्थं वगृहीतमुन्नीयाहवनीयस ॥ मासिके आत्मनो मरणावस्था
पर्यंतं श्वासधारणं कृत्वोपविशेत् ॥ ततः पूर्वमाहुतिं हुत्वा भर्त्सस्याऽनुमंत्रणं कुर्यात् ॥

ततःक्षारहोत्रेवरंदद्यात्॥स्वयंहोमित्वन्यस्मैसन्निहितायचरशब्देनाभिलषितंसागु
म्रतंद्रव्यमुच्यते॥ततउत्तराहुतिप्रभृतिशेषंसमापयेत्॥अत्राहवनीयहोमासागुदये
त्रयाणांहोमानांसाधारणमिदमेकंनैमित्तिकं॥तत्रहुतेगार्हपत्यदक्षिणाग्निहोमासागुद
येचैतद्द्वयोःसाधारणंनैमित्तिकं॥दक्षिणाग्निहोमासाक्कुचेदस्युदयस्तदातदर्थमि
दंनैमित्तिकमितियाज्ञिकाः॥दक्षिणाग्निर्विहारोसार्द्धंभुयेस्तमयेस्तमयेपिवा॥नर्या
पर्याहुतेःप्राग्वाभक्षा॥दःप्राग्यदोदयः॥कृत्वानादिष्टमेतानिकर्तव्यानियथायथमिति
कारिकाकारो॥गार्हपत्यदक्षिणाग्निहोमासागुदयेनादोषहोममुक्तेवान्॥सांख्यायन
सूत्रभाष्यकारोपि॥अहुताभ्युदितेइदमेवप्रायश्चित्तमुक्तंयथाम्नानिवर्तते आहवनीयेहोमेभ्यु ह
दयेसर्वप्रायश्चित्तमिवाविशेषप्रायश्चित्तस्यावचनादितिदत्ताह॥अथाग्निहोत्रप्रतिपाद
र्थमपयाकरणेप्रायश्चित्तान्यभिधीयंते॥तत्रसंचारप्रवेशाकरणेस्त्रीकृतान्यसंचारेण
प्रवेशोवाध्वर्यवंहुत्वायविहितंप्रवेशः कर्तव्यःप्रागंसपर्युक्षणात्॥प्रवेशानंतरंयज
मानस्यस्वस्थानेउपवेशनाचमनाकरणेवाध्वर्यवहोमप्रवृत्तस्यकरणंप्रागंसपर्यु

क्षणात् ॥ कूर्चासादनादीनां पदार्थानामकरणे च सर्वत्राध्वर्यवहोमो भवति ॥ अध्वर्यव
॥३१॥ शब्देन दक्षिणाग्नौ स्रुवगृहीतचतुर्गृहीतहोमः त्वं न्न इत्याद्याहुतिपंचकस्य सकृद्गृही
ते नाहवनीये होम इत्येतावदुच्यते ॥ कूर्चासादनमकृतं प्राक् तत्र स्रुगासादनोत्कार्यं ॥
परिस्तरणं प्राक् तत्र तत्र होमात् ॥ पर्युक्षणं चैवं दोहनः प्रैषः प्राग्वध्याहरणात् ॥
अधिश्रयणादयः पयसः संस्कारः प्राक् दक्षिणाग्निहोमात् ॥ उद्वासिते पयसि स्रुदकोसेकोन
भवति ॥ पूर्वं समिदाधानं प्रागुत्तराहुते ॥ होमोर्ध्वं स्रुवस्य नाशदोषात् वाध्वर्यवमेव ॥ नो
त्पादनं द्रव्यस्य भक्षादीनां लोपः ॥ अपराग्निहोमे अकृते स्थालीस्थस्य द्रव्यस्य नाशदोषा
दौ पूर्ववदन्यत्सजातीयसंस्कृत्यति नापराग्न्यो होमः कार्यः ॥ दिः प्रकंपननिमार्जने प्राक्
भक्षात् ॥ ऊर्ध्वं चाध्वर्यवमेव ॥ अनामिकयाद्भिः प्राशनादीनामकरणेन्यथाकरणे वशे ॥३१॥
षसम्भावं यावत् ॥ देवांजिन्वेत्याद्भिर्निषेकः प्राक्समाप्तेः ॥ प्रतपनसमिदाधानपर्युक्ष
णापस्थानान्यासमाप्तेः ॥ आध्वर्यवबहुत्वाकरणाभितिसर्वत्रज्ञेयं ग्रंथगौरवभयात्पुनः पु न
नर्न लिख्यते ॥ व्रतविसर्गोतीस्यानिः क्रमेण प्रा[illegible]वनीयदक्षिणाग्न्योरुपस्थानात् ॥

सभ्यसमीपासनभस्मोद्धूपसमीपोपगमनयोराध्वर्यवहोमपूर्वकं प्राकृन्नायंहोमाक
रणं॥ उक्तावधेरूर्ध्वं सर्वत्राध्वर्यवमेव॥ नतस्यपदार्थस्यवरणं॥ इति अग्निहोत्रेमेप्रति हो २
पदार्थप्रायश्चित्तं॥ ॥अथ दर्शपूर्णमासयोः प्रतिपदार्थंप्रायश्चित्तान्यभिधीयंते॥
भाकरणे॥ न्यधाकरणे चाध्वर्यवंहुतातस्यकरणमितिसर्वत्रानुक्तमापद्येयं॥ तत्राह
वनीयदक्षिणाग्न्योरनुद्धरणेऽद्धृतयोर्वा प्रागन्वाधानादुपशमेआध्वर्यहोमार्थं मन्य ५
दक्षिणाग्निमाहवनीयं चोद्धृत्याध्वर्यवंहुत्वाऽध्वर्थमाहवनीयदक्षिणाग्न्योरुद्धरण
कुर्यात्॥ अग्न्यान्वाधानस्यसर्वेष्वग्निषुप्रागंत्यहोमात्॥ अग्न्यन्वाधानोत्तरकालमग्न्या
वुगतितुउत्ते॥ वपनं स्वीकृतं प्रक्रमापवर्गात्॥ सर्वत्रावधेरूर्ध्वमाध्वर्यवमात्रं भवति॥
सामर्थ्ये सति व्रतोपायनीयस्याभोजनेपिप्रागस्तमयाभोजनेनरात्रौ॥ नद्वितीयेन्हि॥
माषमसूरमधुपरान्नक्रोधाहंकारभयंविषादकार्पण्यलोभादीनां यजमानेनवर्ज्जे
नाकरणे स्मार्त्तं॥ शुल्कुक्काकरणे श्रौतं॥ स्वीकृतकाले व्रतग्रहणस्याकरणे पूर्ववत्प्रा
ग्वसर्गात्॥ आध्वर्यवपदार्थकाले सस्सम्भाषणे श्रौतमाध्वर्यवंहेतः पदार्थानुष्ठानका

ले होत्रकं॥अवधारितवक्ष्यारण्योषधीनामाभक्षणेऽन्यतरागारा रायने चाध्वर्यु
॥३२॥ वं॥व्यूहपक्षे स्वीकृते पौर्णमास्यामनारंभे आध्वर्यवे पूर्वकं प्रतिपादि कर्त्तव्यं॥ब्रह्म
वरणं प्राक्समाप्तेः॥वृतजपई क्षणाद्यासनसंस्कारः प्राशुषवेशनात्॥उपवेशनेन मा
समाप्तेः॥प्रणीताप्रणयनेन सर्वार्थपक्षे प्रागसंकार्यात्॥संयवनार्थ स्वपक्षे प्राक्संप
वनात्॥अदृष्टार्थ स्वपक्षे प्राग्विमोकात्॥सर्वमत्रमंत्ररहितपदार्थकरणे आध्वर्यु
वमात्रेन पदार्थस्यावृत्तिः॥भूतस्त्वेत्यालंभः प्राग्विमोकात्॥यजमानस्य वाग्यमनाक
रणे प्राग्घविःकृदाह्वानात्॥अथ चारेआध्वर्यवं परिस्तरणप्राक्तनत्रैसहोमात्॥
पुरस्तात्प्रथममिसत्याऽकरणे श्रौतं॥अन्यदिध्वेन्यथाकरणे स्मार्त्तं॥पात्राणामासा
दनं प्राक्तेत्सात्रप्रयोजनात्॥स्रुपाग्निहोत्रहवण्योरादानं प्राक्छुंवीपात्॥तयोर्मध्ये
एकस्यादानविस्मरणे कर्मणे वामिति मंत्रेणातस्यैकस्यादानं॥अध्वर्युर्वाग्यमनं प्रा ॥३२॥
ग्घविःकृतः॥विसर्गे अद्भिर्णा विष्णु विति प्राकरणे कस्यचैछवमंत्रस्य जपः॥ प स्फेया १२
हितपात्रिकरणं प्राग्ग्रहणात्॥धूरसी साद्दीन्यपद्युं तानि संतानि प्राग्ग्रहणात् हविषई

क्षणात् ढंभंभे प्राग्न्यागात्॥ निर्वापः प्रागधिश्रयणात्॥ शेषाभिमर्शनं प्राग्वियोगात्॥
प्राडीक्षणादिसादनांतस्याऽकरणेऽन्यथाकरणे चाध्वर्यवं॥ स्कंदने तूक्तं॥ पवित्रकर
णमामार्जनात्॥ प्रोक्षणीसंस्कारश्चामृगावसेकात्॥ स्कंदने आध्वर्यवं॥ नाशादौ पु
नः स्मृतिः॥ हविःप्रोक्षणं प्राग्न्यागात्॥ पात्राणां प्रोक्षणमात्तत्पात्रप्रयोजनात्॥ प्रेषाक
रणे आध्वर्यवे मात्रं कुक्कुटाहननं प्राक्समाप्तेः॥ कंडनादिकणानि धानांतमोपेषणात्॥
उपवेषादानं प्रागभ्यूहनात्॥ अंगाराणामुद्दूहनमाद्यकपालोपधानात्॥ आदेवयज
मिसंगाराहरणं प्राक्प्रथमकपालोपधानात्॥ ऊर्ध्वं त्वाध्वर्यवमेव॥ सर्वांगुल्या भू
म्येंगारनिधानं प्रागधिश्रयणात्॥ एकादिबहुकपालानामनुपधाने प्रागधिश्रयणा
त्तेषामुपधानं॥ पंचमकपालादीनां प्राग्दक्षिणस्याघारेः समाप्तेः॥ अभ्यूहनं प्राक्पुरोडा
शाधिश्रयणात्॥ उपार्जनमधिश्रयणं प्राक्संयवनात्॥ कृष्णाजिनादाननादीनामनुपक्लो
पधानांतानां प्राक्पेषणात्॥ प्रेषणं प्रोहणं चापामावपनात्॥ ईक्षणं प्राग्न्यागात्॥ पा
त्र्यामावपनं पवित्राभ्यामुपसर्जनीग्रहणमासंयवनात्॥ तच्च प्रागधिश्रयणात्॥ स

पवित्रतापविज्ञाभ्यां प्रतिग्रहणस्य आकरणे चाध्वर्यमात्रं ॥ विभज्यालंभः प्राग्यागात् ॥ आ
॥३२॥ ज्यनिर्वापः प्रागंसाज्यकार्यात् ॥ वेदबंधः प्राग्विमोकात् ॥ आज्यपुरोडाशाधिश्रयणं प्राग्या
गात् ॥ आज्यं प्रागेलाकृते ॥ योगपद्याचारणे आद्युपवमात्रं ॥ प्रथनाद्विरभिमर्शने चाश्र
१ च्यं पणात् ॥ अपांगुलिप्रक्षालनादिश्च तामीनासनांतानां प्राक् स्वस्वप्रयोजनात् ॥ अभिवा
सनस्तु द्वासनात् प्राक् ॥ अभितप्य स्योदकनिनयं वमासमाप्तेः ॥ द्रव्यस्य नाशादोषाद् वाध्वर्य
स्वमात्रं ॥ द्रव्यस्तु स्याद्यनि निनयेद्दितिके चित् ॥ वेदिमानमापूर्वपरिग्रहात् ॥ परिसमूहनं प्राक्
स्तरणात् ॥ उत्करकरणं च ॥ स्तरणवेज्यादानं प्राक् तूष्णीं चतुर्थं स्येत स्मात् ॥ एवस्य स्तरण
स्यादानवि स्मरणे मंत्रवर्ज्जमादानं ॥ आलंभः प्राक् स्तंबयजुषः ॥ स्तरणानिधानं वा चतुर्थप्र
हरणात् ॥ तस्य सोऽङ्गग्न्यतापचारेऽध्वर्यर्यं ॥ लेखाकरणहरणे संमर्शनानि प्राक् स्तरणात् ॥ ॥३३
हरणप्रैषः ॥ प्राग्धुरणात् ॥ स्वननं परिग्रहश्च प्राक् स्तरणात् ॥ अनुमार्जनं च ॥ प्रैषाः ॥ प्रा
११ स्फ्या क्दर्भकरणात् ॥ स्फ्योदकप्रहरणमासमाप्तेः ॥ प्रोक्षणवासादनमोत्यवनात् ॥ इध्मासाद
नं प्राग्निधाधानात् ॥ बर्हिरासादनं आस्तरणात् ॥ स्रुक्संमार्गं आ कर्मापवर्गात् ॥ उपभृत

असंस्रवदेमात्॥ ध्रुवाया अभिमृश्य यजुषः॥ प्राशित्रादीनामातत्र कार्यात्॥ संमार्जनानां
प्रासनमासमाप्तेः॥ पत्नीसंनहनमाविमोकात्॥ आज्योद्वासनमोत्पवनात्॥ ईक्षणमा
कर्मापवर्गाहुतेः॥ वेद्यामासादनं प्रागुत्पवनात्॥ उत्पवनावेक्षणे प्राक्कर्मापवर्गाहुतेः॥ प्रो
क्षण्युत्पवनमामूलोपसेकात्॥ आज्यग्रहणमातयोजनात्॥ इध्मप्रोक्षणं प्रागिध्माधाना
त्॥ वेदिप्रोक्षणमास्तरणात्॥ बर्हिषः प्रोक्षणमासमिष्टयजुर्होमात्॥ मूलावसेचनं च॥
पवित्रयोः प्रणीतासु निधानमाप्रतिपत्तेः॥ बर्हिर्विस्रंसनं प्रस्तरग्रहणे च प्रागंत्यानुस्त
रणात्॥ संनहनविस्रंसनाद्य च तत्सादनांतमाबर्हिर्होमात्॥ वेदिस्तरणमासमिष्टयजुषः॥ प्र
स्तरग्रहणे विस्मृते बर्हिषि स्तृतायां स्मरणे आध्वर्यवे हुत्वा यजमानवाचं यच्छेति प्रैषः॥ प्रस्त
रमात्र बर्हिषः सादनं॥ पूर्वाभ्यासे व पवित्राभ्यां प्रोक्षणीसंस्कारः॥ देव्यायेति प्रेक्षणं॥ अध्व
धिवेदि अग्नीधः प्रोक्षणीनां धारणं॥ प्रोक्षणीरासादय बर्हिरुपसादयेति प्रैषः॥ प्रोक्षणी
नां वेद्यामासादनमग्नीधः॥ प्रणीतानामपरेण प्रस्तरमात्र बर्हिष आदनं॥ प्रोक्षणीनां सवि
तुर्व इत्युत्पवनं॥ बर्हिषः प्रतिग्रहणं॥ वेद्यासादनं ब्रह्मन् बर्हिः प्रोक्षिष्यामीति प्रैषः॥

स्रुवेत्त्वेतिप्रोक्षणं॥मूलावसेकः॥च्छिन्नेप्रस्तरग्रहणं॥अग्नेणसमर्पणं॥प्रस्तरदान
॥३८॥ कालेस्मरणेनभवति॥ततःप्राग्भवति॥समिदाधानमागुस्पर्शनात्॥मूलोपसेचनास्त्रो
क्षप्रोक्षणीशेषस्यनाशदोषादौपुनस्तस्याद्यमूलोपसेचनंकार्यंमूलसंस्कारत्वात्॥प्रस्त
रोन्स्यादानंप्राक्स्मरणात्॥आहवनीयकल्पनंप्राक्कर्मापवर्गाहुतेः॥उल्मुकोद्वहनंप्रागस्मा
नुयाजात्॥परिधिपरिधानमाकर्मापवर्गाहुतेः॥परिधिनाशेदोषादौसंस्कारस्यपु
नःपरिधानं॥प्रथमपरिध्युपस्पर्शनमापरिधिप्रक्षेपात्॥समिदाधानोत्तरकालंकाष्ठां
तरेणाप्युपस्पर्शनंकार्यंपरिधिसंस्कारात्॥स्रुग्व्यानुपस्पर्शस्ययोराधानमासमिष्टयजु
५६ जुषः॥आवेनीयेक्षणंच॥विधृत्योःस्तरणमाप्रस्तरणात्॥सव्यशून्यकरणं॥वाजुह्वा॥आ
सादनात्॥जुह्वाआसादनमाव्यूहनात्॥उपभृतश्च॥आसमिष्टयजुषोध्रुवायाः॥निम
स्मीक्षणंमोद्वासनात्॥पात्र्युपस्तरणंआहविर्निधानात्॥ततामिघारआयागात्॥प्रा ॥३८॥
शित्रदानंच॥कपालांजनंमोद्वासनात्॥उद्वासनमाकर्मसमाप्तेः॥कपालनाशेवक्ष्यते॥हवि
षामासादनंप्राग्यागात्॥आलंभनंच॥आलंभनमासमाप्तेः॥होतृषदनकरणमंत्रा

सल्ली संयाजात् ॥ सामिधेनीप्रैषसंतन्वन्निति प्रैषावाक्ये स सामिधेनी प्रक्षेपात् ॥ अवबाध
नमासमाप्तेः ॥ इध्माधानमासमिष्टयजुषः ॥ प्रतिप्रणवमाधानाकरणे नादिष्टमेव ॥ अन
याजार्थे काष्ठस्थापपन निस्मरणे क्षये ॥ च एकस्य द्वयो बहूनां वा पुनरासादनोपावित्रे चे सल
रैकैतितलः पवित्रछेदनं पवित्राणां च सादनं पूर्वेणैव ध्मसंनहनेन बध्वे ध्मस्यासादनं ॥ पूर्व
ध्मामेव पवित्राभ्यां पुनः प्रोक्षणी संस्कारः ॥ देव्यायेति प्रोक्षणं ॥ पवित्रप्रतिपत्तेरूर्ध्वं तयोरपिच्छे
दनं ॥ प्रोक्षणि नाम ध्यधिवेदि धारणमग्नीधः ॥ अध्वर्यो स्फ्यमुपयम्य प्रोक्षणीरासादयेध्म
मुपसादयेति प्रैषः ॥ अंतर्वेदि प्रोक्षणी नामासादनं ॥ प्रणीतानां पश्चाद्विध्मस्यासादनं ॥ प्रो
क्षणी उत्पवनं सवितुर्व इति ब्रह्मन्निध्ममिति प्रैषः ॥ अनुज्ञातस्य कृष्णोसीति प्रोक्षणं ॥ त
तो यथार्थे विनियोगः ॥ अनुयाजादूर्ध्वमेवमेव ॥ नत्विध्मसंस्कारः ॥ उपवाजनमासमिष्ट
यजुषः ॥ पूर्वाघारआरमाप्तेः ॥ संमार्गओं स्वाहुतेः ॥ संमार्गे प्रावक्षिण्यापचारे स्मार्त्तं ॥ अं
जलिकरणमोत्तरघारहोमात् ॥ पाणिभ्यां जुहूमिसादिदक्षिणतोवस्थानं तानामनादिष्ट
मात्रं ॥ उत्तराघारआसमाप्तेः ॥ मेध्याधिकरणे अनादिष्टं ॥ द्रव्यनाशादोसकृद्गृहीतेनोत्त
राघारः ॥ ध्रुवासमंजनमाप्रथमप्रयाजात् ॥ इध्मसंनहनादानमाहोत्तनामग्रहणात् ॥ आश्रा

वर्णादिहोतृनामग्रहणांतमांत्यपत्नीसंयाजात्॥ संस्रष्टयोरुपवेशनमास्तुगादापनात्॥
येयजामहादीनां याज्यावषट्कारांतानामकरणे अन्यथाकरणे च होतृकं॥ देवतोद्देशेन द्र
॥३५ व्यत्यागाकरणे पुनर्द्रव्यमुत्सृज्य यागः॥ प्रयाजाआसमाप्तेः॥ एकैकस्याकरणे च॥ समानय
नविस्मरणे औहवनेनैव सर्वेष्विष्टिषु पुनरोपमं तेन चतुर्थपंचमयोर्यागः॥ शेषेण हविषामभि
घारणं प्रागाज्यभागार्थं आज्यग्रहणात्॥ नाशदोषादावनादिष्टमात्रं॥ आज्यभागादीनां स्वि
ष्टकृदंतानामासमाप्तेः॥ अनुवाचनादिवपकार्णांतं प्राग्यागात्॥ देवतादिविपर्यासे वक्ष्यते॥
अवत्तस्य नाशदोषादौ स्तमिपातिके रंगैर्युक्तं हविरंतरमुत्साद्य तेन यागः॥ प्रधानयागाद
र्ध्वं विनाशे आज्येन स्विष्टकृत्॥ प्राशित्रादीनां लोपः॥ उपांशुयाजस्य विस्मृतौ समिष्टयजुषः
ऊर्ध्वं स्मरणे प्रकृतं समाप्यादि॥ तेआरभ्य कर्मापवर्गो नमाज्यहविः कर्मावर्तते विहितस्का
नेषु होमाकरणे अन्यथाकरणे वा नादिष्टमात्रं॥ नावृत्तिः॥ अनुब्रूहीत्युक्तानापव्याहृतेदिसा ॥३५॥
दिश्चपव्याहरणे भूर्भुवः स्वरितिवा जपेत्॥ पुनरनुवाचनादि वा कुर्यात्॥ स्रुग्निधानाकरणे ना
दिष्टं॥ संचरादुक्षणमाज्यानुयाज्यत्॥ प्राशित्रेडादिमार्जनांतमासमाप्तेः॥ प्राशित्रेडावदानादि
आचतुर्द्धाकरणात्॥ प्रस्तरादिनाभ्यालंभनांतमासमाप्तेः॥ ईक्षणग्रहणसादनान्याभक्षात्॥

इडासमर्पणादिभागसमर्पणं तमाभक्षणात्॥ जपआसमाप्तेः॥ भक्षोमार्जनं च॥ पवि
त्रप्रतिपत्तिप्रस्तरहोमांत्॥ नाशादोषादेवनादिष्टमेव॥ भागपरिहरणमासमाप्तेः॥
अन्वाहार्याभिधारणाद्यालंभनांतं प्रागदानात्॥ दानेत्वासमाप्तेः॥ उल्मुकेसमास
आअंसानुवोयाजात्॥ प्रैषश्च॥ समिदाधानसंमार्गौ प्राक्समिष्टयजुषः॥ अनुयाजा
आसमाप्तेः॥ समानयनं विस्मरणे जुहूद्रोषेण ध्रौवेण वा कर्तानामनुयाजानामावृत्तिः॥
स्रुग्व्यीपर्यासेनादिष्टमात्रमेव॥ धारानुयाजसे आमाप्तेः॥ व्यूहनं च॥ अनुयाजार्थस्यप्र
षस्यनाशादेषादेवक्ष्यते॥ स्रुक्वाभ्युक्षणमासमाप्तेः॥ परिधिंजनमाप्रक्षेपात्॥ प्राशित्र
ग्रहणादिप्राक्सूक्तवाकात्॥ प्रस्तरादानादीनि मीचेहरणांतान्याप्रस्तरहोमात्॥ विधृत्योः
स्थानेकरणमाबर्हिर्होमात्॥ प्रस्तरहोमआसमाप्तेः॥ तृणप्रक्षेपात्सालंभौ च॥ परस्परसंवा
दआशंयोर्वाकात्॥ शंयोर्वाकः आसमाप्तेः॥ परिधिप्रक्षेपश्च॥ प्राक्पत्नीसंयाजाद्योऽप्र
हरणात्संस्रवाहुतिः॥ स्रुग्विनिधानमासमाप्तेः॥ वेद्यालंभआसमिष्टयजुषः॥ पत्नीसंया
२ जाआसमाप्तेः॥ अग्न्यन्वलंसंचरेणप्रवेशनमां सपत्नीसंयाजात्॥ इडादिभक्षांतमासमाप्तेः॥

अदग्धाहुतिः प्राग्दक्षिणाग्निहोमाद्धविर्ज्ययग्रहणात् ॥ दर्व्यभावादौ सकृद्गृहीतेन जुहुयात् ॥
सव्येनान्वारम्भस्याकरणे आध्वर्यवमेव ॥ दक्षिणाग्निहोमअसमाप्तेः ॥ वेद्योक्तावमोकादिस्त
॥३६॥ रणं वा समाप्तेः ॥ समिष्टयजुश्च ॥ ध्रुवस्य नाशादौ षाद्दौ सकृद्गृहीतेन ॥ बर्हिर्होमन्नासमा
प्तेः ॥ प्रणीतानिनयनं च ॥ उदकाभावे नादिष्टमो वकणापासनमासमाप्तेः ॥ फलीकरणेन
मणीथः कणापासनाकरणे चाध्वाध्वर्यवमेव ॥ पूर्णपात्रनिनयनमासमाप्तेः ॥ विष्णु
क्रमणाद्याहवनीयोपस्थानांतस्याकरणेप्येवमेव ॥ भागस्य नाशादौ षाद्वाध्वर्यवमेव ॥
आवर्त्तनप्रादक्षिण्याकरणे अध्वर्यवं ॥ मनुस्मातंप्रैषं विनाप्रैषार्धे च कृते चाध्वर्यवमे
वा कर्मापवर्गे समिदाधानादीन्यग्निसम्भावयावदाध्वर्यवपूर्वकं कार्याणि ॥ समिधानां
नाशादौ षाद्वाध्वर्यवं हुत्वासादनादिभिः संस्कारैः संस्कृतस्य समिदाधानं कुर्यात् ॥ अत्र ये रू
ढ्वा सर्वत्राध्वर्यवमेव ॥ जलस्याकरणं ॥ मंत्ररहितस्य प्रैषवर्जितस्य करणे चाध्वर्यवमात्रं ॥ ॥३६॥
इति दर्शपूर्णमासयोः प्रतिपदार्थं प्रायश्चित्तानि ॥ ॥ सर्वस्य हविषो नाशे अपहारादिना
अदर्शने जाते दोषे श्लेष्माघर्मव्यचंडालादिस्पर्शेन हविषो दुष्टत्वे जाते अध्वर्यव हुत्वा

तद्व्यवहारेण वा सांनिपातिकैरंगैर्विनष्टं हविस्तस्यापि त्यागः कर्तव्यः ॥ तथा चापस्तंबः ॥ प
र्युषितदैवतं हविर्व्यापद्येत ॥ यथान्यद्धविस्तद्दैवतं निर्वपेत् ॥ वसुगादापनप्रभृतयो मंत्रा आ
वर्तेरन् यदि प्रत्तदैवतमन्येन संस्थापयेदिति ॥ यदि हविःषु केशमक्षिकामूषिकपुरीष
मशकदंशघुणसूक्ष्मपिपीलिकाभिर्णामेध्यजीवलोकैर्मनखादीनि पतितानि दृश्यले
तदा तानि पतितमात्राणि केशादीन्युद्धृत्य भस्मप्रक्षेपणं सप्रक्षेपणं वा सलिलेन प्रोक्ष
णं वाद्भिः प्लावितेन यागं कुर्यात् ॥ चिरपतितेषु लुतदेवं ॥ संलग्नं हविर्द्रव्यमुद्धृत्य ॥ मिद्धिरभ्यु
क्ष्य भस्मनेवकीर्याभिघारणं काञ्चन[illegible]र्जितवैदूर्यप्रवालादिनामेकतमसंस्पृष्टाभि
रद्भिर्मंत्रवत्प्रोक्षितं पर्यग्निकरणादिसंस्कारेण पूतं वाचा शेषं प्रशस्तमुपयुंजीतं केशादिभिः
सह पक्वानां हविषां परित्यागः ॥ पक्षिजग्धं बिडालादिभिरवलीढं गवाघ्रातं सुरवश्वो
सैनोपहतं सुत्रपरिस्तात् ॥ केतस्फुलवोससा वधूननं कीटपतंगे रुदक्यया पापतितैः कृ
बादिभिरभिशनैस्तैर्नास्तिकैः श्वाडालेन सुनावैडालेप्रतकादिभिश्व दूरतो दृष्टमी
षत्तदपहतं वयपशभावेत ॥ तदा सलिलेन सह ॥ म्ह स्मतीरस्थं तरं प्रक्षेप शुद्धिः ॥ देभि

रेवमग्निकृष्टे दृष्टमुपहतं वाभ्युक्ष्य किंचिदुद्धृत्य भस्मना सलिले नर्मदायां संस्कुर्यात् स्रुके
॥३७॥ न सुवर्णेन रजतेन वोपस्पर्शयेत्॥ अजं वा वघ्रापयेत्॥ मधूदकपयोविकारसर्पिषां दोषा
त्पात्रांतरे स्थापितानां पावमानीभिरुदकेनाभ्युक्षणं॥ एतद्वै श्ववायसप्रभृतिस्पर्शे
नोपहतानां॥ मुच्छिष्टस्पर्शे त्वेतद्दधिकं॥ उदके प्रक्षिप्योद्धृत्योपयोजयात्॥ श्ववाय
सखुबिडालनकुलगर्भादिकृते भक्षणघ्राणस्पर्शादिभिरुपहतानां भूतानां पु
रोडाशादीनां त्यागः॥ भक्षणेनैव मधूदकपयोविकारतैलसर्पिःप्रभृतीनां च त्यागः॥
केशश्मश्रुश्लेष्मकर्णविट्दूषिकास्रग्वसामानुषास्थिदंष्ट्रारेतोमूत्रप्रभृतिभिरुपहता
नां हविषां परित्यागः॥ मृदुसूलक्रुरुक्यादिसंस्पृष्टानां चैवमेव मादयोः हविषां दोषाः॥ त
यदोषे दुष्टस्य हविषोप्सु प्रक्षेपणं॥ उच्छेवाभस्मनि प्रक्षेपं कृत्वाऽनादिष्टहोमपूर्वकं सां ॥३७॥
निपातिके रंगे रुत्सादनं कृत्वा तेन यागः कर्त्तव्यः॥ ॥अथवा नायाविनष्टानां हविषां देवताः
प्रतिसंख्याय परिगणय्याज्येन विनष्टहविर्देवतानां यागः कर्त्तव्यः॥ आज्यसंस्कारात्पू
र्वमस्य निमित्तस्य पाते आज्यसंस्कारं वेदिसंस्कारमग्निसंस्कारं च कृत्वाज्येनोपांशु याजे

वह्निन ष्टह विर्द्देवतानां यागः कर्तव्यः॥ पुनः क्रियायां चैवेष्यादिसंस्कृतमेव तस्यां गप्रधा
नार्थत्वादिति पाञ्जिकाः॥ पुनर्[illegible]क्रियते सर्वमपवर्गांतमादित इति कारिकाकारः॥ तथा
चेमानवे॥ यदि हवींषि नष्येयुर्दुष्येयुरपहरेयुर्वा आज्येन संस्थाप्य पुनर्यजेतेति॥ आप
स्तंबसूत्रे॥ यस्य सर्वाणि हवींषि नश्येयुरपहरेयुर्वा आज्येन ता देवताः प्रतिसंख्याय य
जेत पुनर्यामिष्टिमनुस्वर्णां तन्वीत यज्ञो यज्ञस्य प्रायश्चित्तिरिति॥ आश्वलायन ब्राह्म
णे यस्य सर्वाणि हवींषि दुष्येयुर्वापहरेयुर्वा कालत्र प्रायश्चित्तिरिति आज्यस्यैवा नेय थादे
वं प्रतिकल्पयेत याऽथाहविष्मायजेता ताभिष्टिमनुस्वर्णां तन्वीत यज्ञो यज्ञस्य प्राय
श्चित्तिरिति॥ आश्वलायनसूत्रे॥ हविषां व्यापत्तौ स्वस्वदेवताभ्य आज्येनेष्टिं समाप्य पु
नरिष्टिरिति॥ तथा आपस्तंबे हवींषि केशान स्वकीटपतंगो न्येर्वा बीभत्सैरभिन्नसिक्ता वापि
न्य वहरेयुरिति॥ अथर्ववेणसूत्रे॥ सर्वाणि हविंषि अपहरेयुर्वाज्येन तद्देवताय जेताधान्या
म तोषामिष्टिं तन्वीतेति॥ बहुषु हविष्षु मोहे जाते मानवे विशेषः॥ यदि हवींषि बहुधा पुःपान्यां
समिधा विभज्यानुपूर्वेण प्रचरेदिति॥ एवं यावद्धुत्वाऽऽज्यभागानंतरं अस्मिन्नेव विहारे

तेषांविनष्टानांहविषांपुनःकरणमादितआरभ्यकर्मापवर्गांतंभवति॥तथाचकात्या
॥२९॥ कायं॥अथवादुष्टहविषांतस्मिन्कर्मणिदेवताआज्येनधुविनोपांशुयागंसर्वसमा
प्तौ॥पुनस्तत्क्रियतसर्वमपवर्गांतमादितइति॥उपांशुयाजस्यासाधारणहविषो
भावात्तद्धानात्तन्निमित्तंआज्ययागोनाभवतीत्यभिप्रायः॥अत्रैवंकर्मरचना॥सर्व
हविर्नाशेदोषेवादुष्टानामप्सुभस्मनिवाप्रक्षेपः॥संस्कृतेअल्पेअविनष्टेनिमित्त
पातेध्रुवायामाज्येगृहीतेतत्रोऽप्याज्यग्रहणं॥इध्मप्रोक्षणादिध्रुवासादनांतंतत्रस्रुवो
दूहनवर्जं॥ततःस्त्रीमासाद्यध्रुवांस्तोभ्योरालंभः॥आस्मात्लंभादिहोतृवरणां
तंपूर्वं॥आरभ्यक्षेत्रादारवर्जं॥ध्रुवात्तआप्याय्याप्यचतुरवत्तंकृत्वायाज्यापुरोनु
वाक्याभ्यांविशिष्टहविःसंबंधिदेवतानांयागंकुर्यात्॥नस्विष्टकृत्॥नाज्यादशेषादि ॥३९॥
तिन्यायात्॥ततःप्रतिपत्तिरूपंकर्मसमापनीयं॥पवित्रप्रतिपत्तिः॥अग्निसंमार्गः॥
व्यूहनं॥परिध्यंजनं॥सूक्तवाकःप्रेषः॥प्रस्तरास्तानोवीहोमांतं॥अनुप्रहरेतिप्रेषः॥त
पान्नुप्रहरणं॥आस्मात्लंभः॥उदकालंभः॥नसंवत्सरादि॥परिधिप्रक्षेपः॥सोनाप्याय्य

श्वेदुपवेषहोमः॥संस्त्रवाहुतिः॥धुरिनिधानं॥वेदयोक्त्रविमोकः॥आवेदेस्तरणं॥स
मिष्टयजुर्होमः॥बर्हिर्होमः॥प्रणीताविमोकः॥व्रतविसर्गइति॥अथयदिस्थाल्यमाज्य
मभ्येतदुष्टंस्यात्तावन्मात्रमाज्यमासादनादिभिःसान्निपातिकैःसंस्का
रैःकृत्वाद्यवेदिमानंचकृत्वाध्रुवाग्रहणादिपूर्ववच्छागंकुर्यात्॥अथ
यदिपूर्वमाज्यंनिर्वापानिमित्तमापद्यतेतदानिरूप्याज्यमधिश्रित्य
पर्यग्निकृत्वावेदिमानादिस्फ्यादकपहरणवर्जंपत्नीसंनहनांतंकृ
त्वाज्यमुद्वास्यावेक्ष्योत्पूयावेक्ष्यध्रुवाग्रहणादिपूर्ववच्छागंकुर्यात्॥
अनेनप्रकारेणाज्येनदेवताइष्ट्वापुनस्तस्मिन्नेवविहारेसमस्तं
गोरूपेतप्रारब्धशेषंकर्मकुर्यात्॥तस्मिन्पक्षेआध्वर्यवाभावः॥ब
हूनांहविषामध्येएकैकस्यनाशादोषेवाआध्वर्यवंहुत्वासान्निपाति
कैरंगैःपुनस्तत्कुर्यात्॥आज्यग्रहणोत्तरकालंनिमित्तेचेत्तदापात्रा

सादने॥ अग्निहोत्रहवणीवज्यं वर्जितो दशगणः॥ पात्रीधान्यं। उपवेषः।
संयवनोदकं। स्फ्योपहितपात्रीकरणादि हविरासादनांता पात्रप्रोक्षणं।
स्फ्याजिनदानादिकं कुटाहननवर्ज्यं कंडने॥ कपालोपधाने। उपसर्ज
न्यधिश्रयणे। स्फ्याजिनदानाद्याप्योदकदानांतानि ध्मप्रोक्षणादि प्राक्ह
तं कर्म कुर्यात्॥ अथ वायस्यायां हविषोनुत्पत्तिदोषवानवद्धुविर्देवतायाः आज्ये
न यागं कृत्वा पुनर्द्रव्यांतरमुत्पाद्य तेन हविः सहयागः कर्तव्यः। बहुषु हविः
षु एकैकहविर्नाशे प्रायश्चित्तं भवत्येव। ससान्नाय्यके पुनः क्षीरस्यापः
हरणादिना दासीमिव सायंदोहं कृत्वा वत्सनाशे केन दध्ना आतव्यं दधि
संपादयेत्॥ ततः प्रातर्दोहार्थं वत्सापाकरणं कृत्वा ब्रुस्नवुरणादि प्र
स्तिवत्सर्वं कुर्यात्॥ अग्निहोत्रार्थमुद्धृतेषु तरागमने कृते प्रायश्चित्त
नाद्रियेत। अंतरागमनं कुर्यादेव। कथं चिद्गार्हस्थ्यांतरागमने कृते प्राय

च्छिन्नस्याभावः॥ छेदउक्तवराहेषु गार्हपत्यादीनामंतरालेष्वनेषु गार्हप
त्यादारभ्याहवनीयं यावत् उदकधारां संततां निनयेदिदं विष्णुर्विचक्र
मइतिमंत्रेण भस्मनो वा धारां निनयेदनेनैव मंत्रेण॥ अस्मिन्पक्षे गार्हप
त्याद्दस्मादामाहवनीयपर्यंतं संततं निनयेत्॥ श्वाकुकुरः। एको मेषः।
वराहो ग्रामभूकरो विड्वराहः॥ एतदप्यग्निहोत्राद्यर्थमुक्तं तेष्वेव। चक्रीव
तीगर्दभे गार्हपत्यादीनामंतरालेगते आग्नेये पथिकृते ऽष्टाकपालः
पुरोडाशोऽग्न्यन्वाधानादिकर्मापवर्गांतः॥ पथिकृत्स्थानज्ञाधानदक्षिणे
स्यापस्तंबाश्वलायनो॥ कात्यायनसूत्रे॥ पथिकृतोंतरेण विहारं चक्रीव
तिरुते॥ तद्भाष्ये चक्रीवन्तश्च उच्यत इति व्याख्यातमस्ति॥ तद्व्याख्यानयु
क्तमिवाभाति। सर्वविषयमेतदसंयुक्तविधानादिति सर्वक्रत्वादयः॥ अ
ग्निहोत्रे नैमित्तिकमध्ये विधानातदप्यग्निहोत्रविषयमेवेति याज्ञिकाः॥

आश्वलायनब्राह्मणे॥ तदाहुर्यस्य गार्हपत्याहवनीयावन्तरेणा
नो वा रथो वाश्वो वा प्रतिपद्येत का तत्र प्रायश्चित्तिरिति नैतन्मन
सि कुर्यादित्याहुरात्मन्यस्य हिता भवतीति तत्र चून्मनसि कुर्वी
त गार्हपत्यादविच्छिन्नामुदधारां हरेत्तंतुं तन्वन्नुजसोभानुमन्विही
त्याहवनीयादिति॥ आम्नाते ह्येते प्रतिपन्नोचाप्रज्ञाताश्च नित्याः॥ नित्या
नां दर्शपूर्णमासचातुर्मास्याग्रयणेष्टीनां कालातिक्रमे प्रायश्चित्त
त्वेनाग्नये पथिकृतेष्टाकपालः पुरोडाशो भवति। नित्याः वैष्टिपुका
लातिक्रमो भवति नाः नित्यासु तासामनियतकालत्वात्॥ तेनाग्नेर्नि
त्तिकेष्टीनामवश्यकर्तव्यानां निमित्तकालातिक्रमे पि न पथिकृत्॥ किं
तु यदाकदाचिदाध्वर्यवपूर्वकं तासामेवानुष्ठानं॥ सूचेच्चतीष्टिग्रहणा
त्पशुसोमकालातिपन्ने पथिकृत्॥ अथ मतभेदोस्ति॥ मुख्यकालाति

क्रमे आध्वर्यवं हुत्वा गौणकालेनुष्ठानं ॥ गौणमुख्ययोरुभयोरप्यतिक्र
मे चेत्तत्स्थाने तत्र साम्नायते न पथिकृद्भवतीति वासुदेवभट्टगदाधु
रकारिकाकाराः ॥ अपरे तु मुख्यकालातिक्रममात्रे प्रायश्चित्तरूपे
वैयमिष्टिरित्याहुः ॥ तत्तु युक्ततरं सर्वेषु कृत्वान्तरसूत्रेषु तथैव दर्श
नात् ॥ अस्याम्नायपक्षस्तु वचनाभावादुपेक्षणीयः ॥ तेन दर्शपूर्णमा
सयोरेकैकस्य मुख्यकालातिक्रमेपि पथिकृतं कृत्वा गौणकाले करणं ॥
चातुर्मास्येष्वप्येकैकपर्वणो मुख्यकालातिक्रमे पथिकृतं कृत्वा गौण
काले करणं गौणकालस्याप्यतिक्रमे तु नित्यकर्मलोपनिमित्तप्रायश्चि
त्तमेव भवति ॥ न तत्कर्मकर्मान्तरेण तत्कालस्य रुद्धत्वादिति ॥ तथा
च निदानसूत्रं ॥ सर्वमहः प्रातराहुतेः स्थानं ॥ सर्वा रात्रिः सायमाहु
तेः ॥ पूर्वपक्षो दर्शस्यापरपक्षः पौर्णमासस्य ॥ तथा पशुरपू
र्वे पर्वणे संवत्सरे सौमश्च ॥ व्यवाये तु प्रायश्चित्तमेव क्रियते उत्तरेज्या
धिकारार्थमकालेष्वतमस्तमितिनिक्रियते तत्कर्मणोऽन्यस्य कर्म

॥४१॥ णः कालो विरुद्ध इति। मानवे च प्रभवति पत्नावपि प्रथिरदुक्त। कालातिपन्नो
प्रथिरुत्तौ प्रक्षेप दर्शपूर्णमासयोश्चातुर्मास्यपर्वसु नवान्नचालेवाग्रयण
स्येति॥ काठके। अग्नये पथिकृते ऽष्टाकपालं पुरोडाशं यस्य पौर्णमासी वा
मावास्या वातिपद्यते न्यन्नोदयनेन पौर्णमास्यतिपन्नो पश्चाद्दर्शनेनामावा
स्याप्रक्रान्ताच्चेदतिपन्नि निर्वपेदाग्नेयमेवाग्नये पथिकृते कुर्यात्तस्य याज्या
नुवाक्ये वेषा हीति द्वे तु न्यासं तिष्ठते। उभयातिपन्नो चेत् तु होचाहुत्वान्वा
रंभणीयाभिरिष्ट्वा पुनर्दर्शपूर्णमासावावर्तनेति॥ आपस्तंबस्तत्रे॥ अ
अग्नये पथिकृते ऽष्टाकपालं पुरोडाशं निर्वपेद्यो दर्शपूर्णमासयाजी सन्
पौर्णमासीममावास्यां वातिपातयेत्॥ समानतन्त्रं चामरव्युः कार्यो च॥ के
षां चिदा एतस्या यज्ञश्छिद्यते यस्य ये ज्ञे प्रवृत्तेन तरैन्याभिरिष्टि निर्वपंति य
एवासावाग्नेयोष्टाकपालः पौर्णमास्या यो ऽमावास्यायां तमग्नये पथिकृ
ते कुर्यात्तेनैव पुनः प्रंधानमवेति न यज्ञं विच्छिनत्ति रतिविज्ञायते सं
याज्ये एव वा पथिकृतीस्यातामित्यपमितिमानवे च॥ कालप्रवृत्तिस्यात्॥

॥४१॥

ऋरदाग्नेयें मष्टाकपालं पथिकृता वाजयदिति ॥ पशुसोमयोः करणा
द्राक्ते मनुना नव्यैस्तु साम्नाये वैश्वानरेष्टिरभिहिता ॥ इष्टिं वैश्वानरीं
नित्यं निर्वपेदब्दपर्यये ॥ कृतानामपि सोमानां निवृत्त्यर्थमसंभवे ॥ अ
स्यार्थस्त्राकृतानां साग्रव्यानां नित्यानां पशुसोमानामसंभवे द्रव्याद्य
भावात्करणासंभवे तेषां निःवृत्त्यर्थं तत्र साम्नाये प्रतिनिमित्तं वैश्वा
नरीं चरुं तत्तदाब्दसमाप्तौ सकृदपि तां कुर्यादित्यभिप्रायः श्विन्न
इतिदीक्षितइतिगदाधरः ॥ याज्ञवल्क्योपि ॥ प्रतिसंवत्सरं सोमः प
शुप्रत्ययनं तथा ॥ कृत्वाग्रयणेष्टिश्च चातुर्मास्यानि चैव हि ॥ एषा
मसंभवे कुर्यादिष्टिं वैश्वानरीं द्विजः ॥ एषां द्रव्याद्यसंपत्त्या असंभवे
स्वस्वकाले तत्र साम्नाये वैश्वानरीं कुर्यात् ॥ शांखायनः ॥ नाहोमेनाग्नि
ष्ययावाग्नीनुत्सृजेत्सायुश्चिन्तं तु रत्ता ऽतीतानि कर्माणि प्रतिनिर्दध्या
दिति ॥ कालातीतेषु सर्वेषु प्रासवत्स्व परेषु च ॥ कालातीतानिवृत्त्येव वि

दध्यादुत्तराणि च ॥ पक्षादिः पिंडयज्ञादिश्च मादाद्दृष्टं यदि ॥ प्रायश्चित्तं
तेनोद्धृत्य कर्तव्यं तदिनांतरे ॥ तु मेकर्मणि सर्वत्र प्रायश्चित्तं विनिर्दिशेत् ॥ प्रा
यश्चित्ते कृते पश्चान्नित्यं कर्म विधीयते ॥ पिंडपितृयज्ञस्याकरणे तु विशे
षउच्यते ॥ पिंडपितृयज्ञस्य तु अमावास्यायामननुष्ठाने तत्प्रायश्चित्तं तु न
वैश्वानरेष्टिरेव भवति ॥ न तु पिंडपितृयज्ञः ॥ यथाच कात्यायनः ॥ परे
णाग्नेर्नो कृतेस्यार्धं परस्याग्नेर्नो कृते स्वयं ॥ पितृयज्ञात्यये चैव वैश्वदेव हृ
यस्य च ॥ अनिष्ट्वा नवयज्ञेन नवान्नप्राशने तथा ॥ भोजने पतितान्नस्य
चरुर्वैश्वानरो भवेत् ॥ अनाहिताग्नेश्चरुः ॥ आहिताग्नेस्तु इष्टिरेव ॥ य
एवाहिताग्नेः पुरोडाशास्त एवानाहिताग्नेश्चरवः इष्टस्थलत्वात् ॥ तथा च का
रिकायां ॥ मुख्यकालेयदानस्यात्सोणमासः कथं चन ॥ सत्तोनोदिष्टमाद
र्शात्कर्तव्यो यत्र कुत्र चित् ॥ न चेत्प्रागर्द्धात्सस्याद्धंचेनि सहेत क्रिया ॥ त
त्राज्यभागसंयाज्यौदार्शिकैतत्प्रधानतः ॥ तत्रैणां गौनि भेदेन प्रधानानि
भवंति च ॥ यदि दर्शो ह्यतिक्रांतास्तदापथिकृन्निर्भवेत् ॥ एवं दर्शान्निप

न्नः प्राक्पौर्णमान्नत्स्तु तः ॥ पित्र्ययज्ञं विना सोपि कर्त्तव्यो यत्र कुत्रचित् ॥
पित्र्ययज्ञः स्वकाले स्यादभावाद्गौणकालतः ॥ नचेत्संपद्यते तत्र प्राय
श्चित्तं भवेन्नसः ॥ न पौर्णमासं तत्रेस्याद्दर्शोभिन्नप्रयोगतः ॥ पौर्णमासे
प्यतिक्रांते ऽतिपत्तिः पथिकृद्देति ॥ कात्यायनः ॥ पौर्णमासात्यये हव्ये
होतावायदहर्भवेत् ॥ तदहर्जुहुयाद्देवममावास्यात्ययेपि च ॥ आहूय
माने ऽनर्भ्रश्वे तत्काले समाहिते ॥ संपन्ने तु यथातत्र हूयते यदि होन्व्यते ॥
आहुत्ताः परिसंख्याय पात्रे दत्त्वाहुतीः सकृत् ॥ मंत्रेण विधिवद्धुत्वे ए
वमेवापरा अपि ॥ तथा स्वकाले सायमाहुतेरप्राप्तौ होत्रहव्ययोः ॥ प्रा
क्प्रातराहुतेः कालः प्रायश्चित्ते हुते सति ॥ प्राक् सायमाहुतेः प्रातर्होम
कालानतिक्रमः ॥ प्राक् पौर्णमाद्दर्शस्य प्राग्दर्शादितरस्य तु ॥ वैश्वदेवे
त्वतिक्रांते अहोरात्रमभोजनं ॥ प्रायश्चित्तमथो कृत्वा पुनः संततु यो हु
तं ॥ होमद्वयात्यये दर्शपूर्णमासात्यये तथा ॥ पुनरेवाग्निमादध्यादिति
भार्गववृसनं ॥ अत्र त्रिकांडमंडनः ॥ मुख्यकाले यदावश्यं कर्म कर्त्तुं नरा

हु ११

॥४३॥ क्यते ॥ गौणकालेपि कर्त्तव्यं गौणोप्यत्र विधिर्भवेत् ॥ १ ॥ कर्मणां गौणका
लपरिमाणमपि स एवाह ॥ आसायमाहुतेः कालः कालोस्ति प्रातराहु
तेः ॥ प्रातराहुतिकालात्साकंकालः स्यात्सायमाहुतेः ॥ पौर्णमासस्य कालो
स्ति पुरा दर्शस्य कालतः ॥ पौर्णमासस्य कालोत्राग्दर्शकालोपि विद्यते ॥
वैश्वदेवस्य कालोस्ति प्राक्पञ्चाससविधानतः ॥ प्रघासानां च कालोस्या
साकमेधीयकालतः ॥ स्यात्साकमेधकालोप्याशुनासीरीयकालतः ॥ शु
नासीरीयकालोप्या वैश्वदेवककालतः ॥ श्यामाकेव्रीहिमिश्रे वय
वैरन्योन्यकालतः ॥ प्राग्यष्टुं युज्यते वर्ष्यं नत्वत्राग्रायणात्ययः ॥ द
क्षिणायनकालेषौ च — — ज्यायोत्तरायणे ॥ अन्योन्यकालतः पूर्वं
यष्टुं उक्ते न उभे अपि ॥ एवमागामियागीयमुख्यकालादधस्तनः ॥
स्वकालादुत्तरो गौणः कालः स्यात्सर्वकर्मणः ॥ यद्वागामिक्रियामुख्य
कालस्याप्यंतरालवत् ॥ गौणकालत्वमिच्छंति केचित्प्राकृतकर्मणि ॥
गौणेष्वेतेषु कालेषु कर्म चोदितमाचरेत् ॥ प्रायश्चित्तप्रकरणप्रो

क्रातीतमाचरेत्॥ प्रायश्चित्तमकुर्वाणो गौणकाले समाचरेत्॥ नित्ये हि
मग्निहोत्रं च भरद्वाजीयभाष्यतः॥ मुख्यकाले हि मुख्यं चेत्साधनं नैव ल
भ्यते॥ तत्कालद्रव्ययोः कुस्य मुख्यत्वं गौणतापि वा॥ मुख्यकालमुपाश्रि
त्य गौणमप्यस्तु साधनं॥ न मुख्यद्रव्यलोभेन गौणकालप्रतीक्षणं॥ हो
मे तु विशेषमाह स एवं॥ एकपक्षगतो यावान् होमसंधोपि पृच्छ्यते॥ पक्ष
होमविधानांते कृत्वा तं तु मतीयजीत॥ स्वकालोत्कर्षितः श्रेष्ठ गौणकालो
निरूपितः॥ अपकर्षदथान्योपि गौणकालो निरूप्यते॥ आमया व्या
र्त्तिमानाय कृतो वा ध्वगतोपि वा॥ राष्ट्रभ्रंशे यथाभावे गुरुगेहे वसन्नपि॥
अन्येष्वेवं प्रकारेषु निमित्तेष्वागतेषु च॥ समासमग्निहोत्राणां यथासं
भवमाचरेत्॥ अनातुरोप्रवासी च निश्चिंतो निरुपद्रवः॥ पक्षहोमं तु यः
कार्यात्स चरेत्स्मृतितंत्रके॥ निमित्तानामिहैतेषां निर्दिश्येकं यदुच्यते॥
तत्सर्वेषु निमित्तेषु जानीयात्प्रातिपादिकं॥ पक्षहोमानतोषान्वीशेषहो

मानधापिवा॥समूस्यजुहुयात्तत्रप्रयोगोपनिरूप्यते॥प्रतिपद्युन्नयेत्सा
यमाग्नहायत्रवादिने॥यावैत्योपवसथ्यात्ताग्निनिभवंतिहि॥तावंति
परिगृह्णीयाच्चतुरुन्नयनानिच॥पात्रांतरसहायांवानिस्थायांप्रेरतस्थानि॥
स्थूलंस्क्रूगंतरंवापिकृत्वातत्रसमुन्नयेत्॥एकस्मिन्सकृद्धोमःसकृदेव
निर्मार्जनं॥उपस्थानंसकृत्कार्यंशेषाप्रवृत्तिरिष्यते॥एवमेवोत्तरत्रापिहि
प्रातर्होमात्समस्यतु॥जुहोत्येोपवसथ्याह्नः॥प्रातर्होमावधीत्सकृत्॥स
मारोपेविधानेनसमारोपयतेनला तु॥नैधार्यतेन्यथाधायान्धारयेत्स्ये
वपूर्ववत्॥एवंप्रतिपदोन्यत्रयत्रापदुपजायते॥तथैवोपसथ्यात्त्राक
ह्यचेद्यापद्दिनत्रयनि॥तृतीयायांचतुर्थ्यांवापंचम्यांवापरत्रवा॥तदादी
नांतुदेतानांहोमानांस्यात्समासता॥अपदेवावधिर्होमसमासस्याभ्यु
पेयते॥तस्मात्कदाचिदारभ्ययावतस्तावतोपिवा॥आपत्कालसमान्हो
मात्समस्येदेकपक्षगात्॥अतएववृद्धिरात्रायत्रिरात्रायाधिकायवा॥से
मस्यजुहुयाद्धोमनित्येवंपन्च्यतेकठैः॥प्रवासिनोग्निहोत्रेस्यपंचाहेस

[OrderDescription]
,CREATED=22.01.20 15:40
,TRANSFERRED=2020/01/22 at 16:02:00
,PAGES=85
,TYPE=STD
,NAME=S0002624
,Book Name=M-2282-AASHVALAYAN GRIHSUTRAM
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF

FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF

FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF

FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF

FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF

FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,